हरिहररूपिण्यै० । गङ्गायै० । नर्मदायै० । गौर्यै० । भागीरथ्यै० । तुंगायै० ।
भद्रायै० । कृष्णावेण्यै० । भवनाशिन्यै० । सरस्वत्यै० । काबेय० । सिन्धवे० ।
गौतम्यै० । गोमत्यै० । गायत्र्यै० । गरुडायै० । गिरिजायै० । चन्द्रचूडायै० ।
सर्वैश्वर्यै० । महालक्ष्म्यै नमः ।

सर्वपापहरे देवि ! सर्वोपद्रवनाशिनि । सर्वसम्पत्प्रदे देवि ! यमुनायै नमोऽस्तु ते ॥

धूपम्—दशांगो गुग्गुलोद्भूतश्चन्दनागरुसंयुतः । कपिलाघृतसंयुक्तो धूपोऽयं प्रतिगृह्यताम् ॥
दीपम्—घृतवर्तिसमायुक्तं वह्निना योजितं मया । गृहाण दीपकं देवि ! सर्वैश्वर्यप्रदायिनि ॥
नैवेद्यम्—शर्करामधुसंयुक्तं दधिक्षीराज्यसंयुतम् । पक्वमन्नं मया दत्तं नैवेद्यं प्रतिगृह्यताम् ॥
हस्तप्रक्षालनम्—पानीयं पावनं श्रेष्ठं गंगादिसरिदुद्भवम् । हस्तप्रक्षालनं देवि गृहाण मुखशोधनम् ॥
मुखप्रक्षालनम्—कर्पूरेण समायुक्तं यमुने ! चारुचन्दनम् । समर्पितं मया तुभ्यं करोद्वर्तनकं कुरु ॥
करोद्वर्तनार्थं चन्दनम् । इदं फलमिति फलम् । पूगीफलमिति ताम्बूलम् । हिरण्यगर्भेति दक्षिणाम् ॥
आर्तिक्यम्—त्रैलोक्यपावने ! गंगे ! अन्धकारविनाशिनि । पञ्चार्तिक्यं गृहाणेदं विश्वप्रीत्यै नमोऽस्तु ते ॥

पुष्पाञ्जलिम्—केतकीजातिकुसुमैर्मल्लिकामालतीभवैः। पुष्पाञ्जलिर्मयादत्तस्तव प्रीत्यै नमोऽस्तु ते॥
प्रदक्षिणा—अन्यथा शरणं नास्ति त्वमेव शरणं मम। तस्मात्कारुण्यभावेन संरक्ष परमेश्वरि!॥
नमस्कारान्—सुरासुरेन्द्रादिकिरीटमौक्तिकैर्युक्तं सदा यत्तव पादपङ्कजम्।
परावरं पातु वरं सुमङ्गलं नमामि भक्त्या मम कामसिद्धये॥
भवानि! च महालक्ष्मि! सर्वकामप्रदायिनि। व्रतं सम्पूर्णतां यातु यमुनायै नमोऽस्तु ते॥
यमुनाकलशोपरि पूर्णपात्रं निधाय तस्योपरि सप्तफणायुक्तं शेषं संस्थाप्य पूजयेत्—
ध्यानम्—ब्रह्माण्डाधारभूतं च यमुनान्तरवासिनम्। फणासप्तसमायुक्तं ध्यायेऽनन्तं हरिप्रियम्॥
आवाहनम्—शेषं सप्तफणायुक्तं कालपन्नगनायकम्। अनन्तशयनार्थं त्वां भक्त्या ह्यावाहयाम्यहम्॥
आसनम्—नव नागकुलाधीश! शेषोद्धारक काश्यप! नानारत्नसमायुक्तमासनं प्रतिगृह्यताम्॥
पाद्यम्—अनन्तप्रिय शेषेश जगदाधारविग्रह! पाद्यं गृहाण भक्त्या त्वं कादृवेय! नमोऽस्तु ते॥
अर्घ्यम्—कश्यपानन्दजनक मुनिवन्दित भो प्रभो! अर्घ्यं गृहाण सर्वज्ञ सादरं शंकरप्रिय॥
आचमनम्—सहस्रफणिरूपेण वसुधोद्धारक प्रभो! गृहाणाचमनं देव पावनं च सुशीतलम्॥

मधुपर्कम्—कुमाररूपिणे तुभ्यं दधिमध्याज्यसंयुतम्। मधुपर्कं प्रदास्यामि सर्पराज नमोस्तु ते॥
पञ्चामृतम्—पयो दधि घृतं चाथ मधु वै शर्करा तथा। पञ्चामृतं गृहाण त्वं प्रसीद परमेश्वर॥
स्नानम्—गंगादिपुण्यतीर्थैस्त्वाममिषिञ्चेयमादरात्। बलभद्रावतारेश! नन्दज श्रीपतेः सखे॥
वस्त्रम्—कौशेययुग्मं देवेश! प्रीत्या तव मयाऽर्पितम्। गृहाण पन्नगाधीश तार्क्ष्यशत्रो नमोऽस्तु ते॥
यज्ञोपवीतम्—सुवर्णनिर्मितं सूत्रं ग्रथितं कण्ठहारकम्। अनेकरत्नैः खचितं सर्पराज नमोऽस्तु ते॥
सर्वाभरणम्—अनेकरत्नान्वितहेमकुण्डले माणिक्यसंकाशितकंकणद्वयम्।
हेमाङ्गुलीयं कृतरत्नमुद्रिकं हैमं किरीटं फणिराजमर्पितम्॥
अङ्गपूजा—ॐ सहस्रपादाय नमः पादौ पूजयामि॥ गूढगुल्फाय नमः गुल्फौ पूज०॥ हेमजङ्घाय० जङ्घे पू०॥ मन्दगतये० जानुनी पू०॥ पीताम्बराय० कटिं पू०॥ गम्भीरनाभाय० नाभिं पू०। पवनाशनाय० उदरं पू०॥ उरगाय० हस्तौ पू०॥ कालिकाय० भुजौ पू०॥ कम्बुकण्ठाय० कण्ठं पू०॥ विषवक्त्राय० वक्त्रं पू०॥ अनन्तप्रियाय नमः सर्वाङ्गं पूजयामि॥
धूपम्—वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

दीपम्—आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्॥
नैवेद्यम्—नानापक्वान्नसंयुक्तं सुस्वादु मधुरं मधु। नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु॥
मध्ये पानीयम्॥ उत्तरापोश०॥ हस्तप्रक्षालनम्॥ मुखप्रक्षालनम्॥ करोद्वर्तनार्थं चन्दनम्॥
पूगीफलम्॥ ताम्बूलम्॥ फलम्—इदं फलम्०॥ दक्षिणाम्—हिरण्यगर्भेति०॥
मन्त्रपुष्पम्—नानाकुसुमसंयुक्तं पुष्पाञ्जलिमिमं प्रभो! कश्यपानन्दजनक सर्पेश! प्रतिगृह्यताम्॥
प्रदक्षिणा—यानिकानि च पापानि जन्मान्तर कृतानि च। तानि तानि प्रणश्यन्तु प्रदक्षिण पदेपदे॥
नमस्कारान्—नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादक्षिशिरोरुबाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः॥
प्रार्थना—अनन्तकल्पेक्तफलं देहि मे त्वमहीश्वर! त्वत्पूजारहितश्चार्द्धफलं प्राप्नोति मानव॥
द्वारपूजा—प्राग्द्वारे द्वारश्रियै नमः। नन्दायै न०। सुनन्दायै न०। धात्र्यै न०। विधात्र्यै न०।
चिच्छक्तयै न०। शंखनिधये न०। पद्मनिधये न०। दक्षिणद्वारे—द्वारश्रियै न०। चण्डायै न०।
प्रचण्डायै न०। धात्र्यै न०। चिच्छक्त्यै न०। मायाशक्त्यै न०। शङ्खनिधये न०। पद्मनिधये

न०। पश्चिमद्वारे—द्वारश्रियै न०। बलायै न०। धात्र्यै न०। विधात्र्यै न०। चिच्छक्त्यै न०। मायाशक्त्यै न०। शङ्खनिधये न०। पद्मनिधये न०। उत्तरद्वारे—द्वारश्रियै न०। सहाबलायै न०। प्रबलायै न०। धात्र्यै न०। विधात्र्यै न०। चिच्छक्त्यै न०। शङ्खनिधये न०। पद्मनिधये न०।

पीठपूजा—मध्ये वास्तुपुरुषाय नमः। मण्डूकाय न०। कालाग्निरुद्राय न०। आधारशक्त्यै न०। कूर्मायै न०। पृथिव्यै न०। अमृतार्णवाय न०। श्वेतद्वीपाय न०। कल्पवृक्षेभ्यो न०। मणिमन्दिराय न०। हेमपीठाय न०। धर्माय न०। अधर्माय न०। ज्ञानाय न०। वैराग्याय न०। ऐश्वर्याय न०। अनैश्वर्याय न०। सहस्रफणान्वितायानन्ताय न०। सर्वतत्त्वाय न०। पद्माय न०। आनन्दकन्दाय न०। संविन्नालाय न०। वह्निमण्डलाय०। सं सत्त्वाय न०। रं रजसे न०। तं तमसे न० आत्मने न०। परमात्मने न०। अन्तरात्मने न०। ज्ञानात्मने न०। प्राणात्मने न०। कालात्मने न०॥ पूर्वादिदिक्षु—जयायै नमः। विजयायै न०। अजितायै न०। अपराजितायै न०। नित्यायै न०। विनाशिन्यै न०। दोग्ध्र्यै न०। अघोरायै न०। मङ्गलायै न०। आधारशक्तिकमलाशनाय न०

अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋक्सामाथर्वाणिच्छन्दांसि परा प्राणशक्तिर्देवता

आं बीजम्। ह्रीं शक्तिः। क्रौं कीलकम्। श्रीमदनन्तस्य प्राणप्रतिष्ठापने विनियोगः॥ ॐ आँ ह्रीं क्रौं अं यं रं लं वं शं षं सं हं क्षं अः क्रौं ह्रीं आं अनन्तस्य प्राणा इह प्राणाः॥ ॐ आं ह्रीं क्रौं० अनन्तस्य जीव इह स्थितः॥ ॐ आं ह्रीं क्रौं० अनन्तस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुः श्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानीहागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥

ॐ असुनीतेपुनरस्मासुचक्षुः पुनः प्राणमिहनोधेहि भोगम्॥ ज्योक्पश्येमसूर्यमुच्चरन्तमनुमतेमृडयानः स्वस्ति॥ चत्वारि वाक्० गर्भाधानादि संस्कारसिद्ध्यर्थं पञ्चदश प्रणवावृत्तिः करिष्ये॥

ॐ रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः।
पाशं कोदण्डमिक्षूद्भवमथ गुणमप्यङ्कुशं पञ्चबाणान्॥
बिभ्राणाऽसृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या।
देवीबालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥

अनन्तपूजा ध्यानम्–ततस्तु मूलमन्त्रेण नमस्कृत्य जनार्दनम्। नवाम्रपल्लवाभासं पिङ्गलश्मश्रुलोचनम्॥
पीताम्बरधरं देवं शङ्ख-चक्र-गदाधरम्। अलंकृतं समुद्रस्थं विश्वरूपं विचिन्तये॥

आवाहनम्[1] —आगच्छानन्त देवेश तेजोराशे जगत्पते ! इमां मया कृतां पूजां गृहाण पुरुषोत्तम ॥
आसनम्—नानारत्नसमायुक्तं कार्तस्वरविभूषितम् । आसनं देवदेवेश ! गृहाण पुरुषोत्तम ॥
पाद्यम्—गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाऽऽहृतम् । तोयमेतत् सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ॥
अर्घ्यम्—अनन्तानन्तदेवेश ! अनन्तफलदायक । अनन्तानन्त रूपोऽसि गृहाणार्घ्यं नमोऽस्तु ते ।
आचमनम्—गङ्गोदकं समानीतं सुवर्णकलशे स्थितम् । आचम्यतां हृषीकेश ! प्रसीद पुरुषोत्तम ॥
स्नानम्—अनन्तगुणरूपाय विश्वरूपधराय च । नमो महात्मदेवाय अनन्ताय नमो नमः ॥
पञ्चामृतं, पयः—सुरभेस्तु समुत्पन्नं देवानामपि दुर्लभम् । पयो ददामि देवेश स्नानार्थं प्रतिगृह्यताम् ॥
दधि—चन्द्रमण्डलसंकाशं सर्वदेवप्रियं हि तत् । ददामि दधि देवेश स्नानार्थं प्रतिगृह्यताम् ॥
घृतम्—आज्यं सुराणामाहारं आज्ये लोकाः प्रतिष्ठिताः । आज्यं पवित्रं परमं स्नानार्थं प्रतिगृह्यताम् ॥
मधु—सर्वौषधिसमुत्पन्नं पीयूषसदृशं मधु । स्नानाय ते मया दत्तं गृहाण परमेश्वर ॥
शर्करा—इक्षुसारसमुद्भूतां शर्करां मधुगं शुभाम् । स्नानाय ते मया दत्तं गृहाण परमेश्वर[2] ॥

१-सहस्रशीर्षेत्यादि वैदिकमन्त्रैश्च यथालाभः पूजयेत् । २-नाममन्त्रैः पूर्वपूजां कुर्यात् । पुरुषसूक्तेनाभिषेकः ।

वस्त्रम्—तप्तकाञ्चनवर्णाभं कौशेयं च सुनिर्मितम्। वस्त्रं गृहाण देवेश! लक्ष्मीयुक्त! नमोऽस्तु ते॥
यज्ञोपवीतम्—दामोदर नमस्तेऽस्तु त्राहि मां भवसागरात्। ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम॥
ग्रन्थिपूजा—श्रियै नमः। भोहिन्यै०। पद्मिन्यै०। महाबलायै०। अजायै०। मङ्गलायै०। वरदायै०।
शुभायै०। जयायै०। विजयायै०। जयन्त्यै०। पापनाशिन्यै०। विश्वरूपायै०। सर्वमङ्गलायै नमः॥१४॥
अङ्गपूजा—मत्स्याय नमः पादौ पूजयामि। कूर्माय नमः गुल्फौ पू०। वराहाय नमः जानुनी पू०॥
नारसिंहाय० ऊरू पू०। वामनाय० कटिं पू०। रामाय० उदरं पू०। श्रीरामाय०हृदयं पू०।
कृष्णाय० मुखं पू०। सहस्रशिरसे० शिरः पू०। श्रीमदनन्ताय नमः सर्वांगं पूजयामि।
प्रथमावरणपूजा—अनन्तस्य दक्षिणपार्श्वे रमायै नमः। वामपार्श्वे भूम्यै नमः॥
आवरणदेवतामावाह्य हस्तौ प्रक्षाल्य गन्धं पुष्पं तर्जनीमध्यमाङ्गुष्ठैर्धृत्वा मध्ये शंखोदकं गृहीत्वा मन्त्रान्ते शंखोदकं भूमौ निक्षिप्य पुष्पं देवोपरि निक्षिपेत्॥
दयाब्धे! त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥१॥
द्वितीयावरणार्चनम्, पूर्वादिक्रमेण—दृढोत्काय नमः। महोत्काय०। शतोत्काय०। सहस्रोत्काय०॥

दयाब्धे! त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥२॥

तृतीयावरणार्चनम्—वासुदेवाय नमः। सङ्कर्षणाय०। प्रद्युम्नाय०। अनिरुद्धाय०। दयाब्धे० ॥३॥

चतुर्थावरणार्चनम्, प्राच्याम्—केशवाय नमः। नारायणाय०। माधवाय०। गोविन्दाय०। मधुसूदनाय०, त्रिविक्रमाय०। वामनाय०। श्रीधराय०। हृषीकेशाय०। पद्मनाभाय०। दामोदराय। दयाब्धे०। ४॥

पञ्चमावरणार्चनम्, पूर्वादिक्रमेण—मत्स्याय नमः। कूर्माय०। नारसिंहाय०। वामनाय०। परशुरामाय० श्रीरामाय०। कृष्णाय०। बौद्धाय०। कल्कये०। अनन्ताय०। विश्वरूपिणे नमः॥ दयाब्धे०॥५॥

षष्ठावरणार्चनम्, पूर्वे—अनन्ताय नमः। दक्षिणस्यां ब्रह्मणे नमः। पश्चिमायां वायवे नमः। उत्तरस्यामीशानाय नमः। आग्नेय्यां वारुण्यै नमः। नैर्ऋत्यां गायत्र्यै नमः। वायव्यां भारत्यै नमः। ऐशान्यां निर्जितायै नमः। अग्रे गरुडाय नमः। वामे सुपुष्पाय नमः॥ दयाब्धे! त्राहि०॥ ६॥

सप्तमावरणार्चनम्, पूर्वादिक्रमेण—इन्द्राय नमः। अग्नये०। यमाय०। निर्ऋतये०। वरुणाय०। सोमाय०। ईशानाय नमः॥ दयाब्धे! त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या सम० ॥७॥

अष्टमावरणार्चनम्—आग्नेयां शेषाय नमः। नैर्ऋत्यां विष्णवे नमः। वायव्यां विधये नमः। ऐशान्यां प्रजापतये नमः॥ दयाब्धे! त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं० ॥८॥

नवमावरणार्चनम्—आग्नेयां, गणपतये नमः। नैर्ऋत्यां, सप्तमातृभ्यो नमः। वायव्यां, दुर्गायै नमः। ऐशान्यां, क्षेत्राधिपतये नमः॥ दयाब्धे! त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या० ॥९॥

दशमावरणार्चनम्—मध्ये, ब्रह्मणे नमः। भास्कराय०। शेषाय०। सर्वव्यापिने०। ईश्वराय०। विश्वरूपाय०। महाकायाय०। सृष्टिकर्त्रे०। कृष्णाय०। हरये०। शिवाय०। स्थितिकारकाय०। अन्तकाय नमः॥ दयाब्धे! त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं० ॥१०॥

एकादशावरणार्चनम्—शौरये नमः। वैकुण्ठाय०। महाबलाय०। पुरुषोत्तमाय०। अजाय०। पद्मनाभाय०। मङ्गलाय०। हृषीकेशाय०। वरदाय०। मधुसूदनाय०। अच्युताय०। अनन्ताय०। गोविन्दाय०। विजयाय०। अपराजिताय०। कृष्णाय०॥ दयाब्धे! त्राहि संसारसर्पान्मां० ॥११॥

द्वादशावरणार्चनम्—अनन्ताय नमः। कपिलाय०। शेषाय०। संकर्षणाय०। हलायुधाय०। तारणाय०। शीरपाणय०। बलभद्राय नमः॥ दयाब्धे! त्राहि संसारसर्पान्मां शरणागतम्० ॥१२॥

त्रयोदशावरणार्चनम्—क्षीराब्धिशायिने नमः । अच्युताय० । भूम्याधाराय० । लोकनाथाय० । फणा-
मणिविभूषणाय० । सहस्रमूर्ध्ने० । सहस्राचिषे नमः ॥ दयाब्धे ! त्राहि संसारसर्पान्मां० ॥१३॥
चतुर्दशावरणार्चनम्—केशवादि चतुर्विंशतिनामभिः ॥ दयाब्धे ! त्राहि संसारसर्पान्मां शरणा० ॥ १४ ॥
पत्रपूजा—कृष्णाय नमः पलाशपत्रं समर्पयामि । विष्णवे० औदुम्बरपत्रं स० । हरये० अश्वत्थपत्रं स०
शम्भवे० भृंगराजपत्रं स० । ब्रह्मणे० जटाधारपत्रं स० । ईश्वराय० आम्रपत्रं स० । विश्वरूपिणे०
कदलीपत्रं स० । महाकालाय० अपामार्गपत्रं स० । सृष्टिकर्त्रे० करवीरपत्रं स० । स्थितिकर्त्रे०
पुन्नागपत्रं स० । अन्तकाय नमः नागवल्लीपत्रं समर्पयामि ॥
पुष्पपूजा—अनन्ताय नमः पद्मपुष्पं समर्पयामि । विष्णवे० जातीपुष्पं स० । अव्ययाय० कह्लारपुष्पं
स० । सहस्रजिते० केतकीपुष्पं स० । अनन्तरूपिणे० बकुलपुष्पं स० । इष्टाय० शतपुष्पं स० ।
विशिष्टाय० पुन्नागपुष्पं स० । शिष्टेष्टाय० करवीरपुष्पं स० । शिखण्डिने० धत्तूरपुष्पं स० ।
नहुषाय० कुन्दपुष्पं स० । विश्वबाहवे० मल्लिकापुष्पं स० । महीधराय० मालतीपुष्पं स० ।
अच्युताय० कर्णिकारपुष्पं स० । अन्तकाय नमः कदलीपुष्पं समर्पयामि ॥

अष्टोत्तरशतनामभिः पूजयेत्—ॐ अनन्ताय नमः। अच्युताय नमः। अद्भुतकर्मणे नमः। अमितविक्रमाय नमः। अपराजिताय नमः। अखण्डाय नमः। अग्निनेत्राय नमः। अग्निवपुषे नमः। अदृश्याय नमः। अत्रिपुत्राय नमः ॥ १० ॥ अनन्तकुलाय नमः। अनिशिने नमः। अनघाय नमः। अब्दनीलाय नमः। अहरहाय नमः। अष्टमूर्तये नमः। अनिरुद्धाय नमः। अनिविष्टाय नमः। अचञ्चलाय नमः। शब्दातिगाय नमः ॥ २० ॥ अचलरूपाय नमः। अखिलधराय नमः। अव्यक्ताय नमः। अनरूपाय नमः। अभयङ्कराय नमः। अक्षताय नमः। अवपुषे नमः। अयोनिजाय नमः। अरविन्दाय नमः। अशनवर्जिताय नमः ॥ ३० ॥ अधोक्षजाय नमः। अदितिपुत्राय नमः। अम्बिकापतिपूर्वजाय नमः। अपस्मारनाशिने नमः। अव्ययाय नमः। अनादये नमः। अप्रमेयाय नमः। अघशत्रवे नमः। अमरारिघ्नाय नमः। अनिश्वराय नमः॥४०॥ अजाय नमः। अघोराय नमः। अनादिनिधनाय नमः। अमरप्रभवे नमः। अग्राह्याय नमः। अक्रूराय नमः। अनुत्तमाय नमः। अरूपाय नमः। अह्ने नमः। अमोघाधिपतये नमः ॥ ५० ॥ अजाय नमः। अक्षयाय नमः। अमृताय नमः। अघोरवीर्याय नमः। अव्यङ्गाय नमः। अविघ्नाय

नमः। अतीन्द्रियाय नमः। अमिततेजसे नमः। अमितये नमः। अष्टमूर्तये नमः ॥ ६० ॥ अनिलाय नमः। अवशाय नमः। अणोरणीयसे नमः। अशोकाय नमः। अरविन्दाक्षाय नमः अधिष्ठाय नमः। अमितनयनाय नमः। अरण्यवासिने नमः। अप्रमत्ताय नमः। अनन्तरूपाय नमः ॥ ७० ॥ अनलाय नमः। अनिमिषाय नमः। अस्त्ररूपाय नमः। अग्रगण्याय नमः। अप्रमिताय नमः। अनन्तकाय नमः। अचिन्ताय नमः। अपांनिधये नमः। अतिसुन्दराय नमः। अमरप्रियाय नमः ॥८०॥ अष्टसिद्धिप्रदाय नमः। अरविन्दप्रियाय नमः। अरविन्दोद्भवाय नमः। अनयाय नमः। अर्थाय नमः। अक्षोभ्याय नमः। अर्चिष्मते नमः। अनेकमूर्तये नमः। अनन्तब्रह्माण्डपतये नमः। अनन्तशयनाय नमः ॥ ९० ॥ अमराधिपतये नमः। अनाधाराय नमः। अनन्तनाम्ने नमः। अनन्तश्रिये नमः। अक्षराय नमः। अमायाय नमः। आश्रमस्थानाय नमः। आश्रमातीताय नमः। अन्नदाय नमः। आत्मयोनये नमः ॥ १०० ॥ अवनीपतये नमः। अवनीधराय नमः। अनादये नमः। आदित्याय नमः। अमृताय नमः। अपवर्गप्रदाय नमः। अव्यक्ताय नमः। अनन्ताय नमः ॥१०८॥

धूपम्–दशाङ्गगुग्गुलोद्भूतं चन्दनागुरुसंयुतम्। सवघ्राणुत्तमं धूपं गृहाण सुरपूजित॥
दीपम्–आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्॥
नैवेद्यम्–अन्नं चतुर्विधं स्वादु पयोदधिघृतैर्युतम्। नानाव्यञ्जनशोभाढ्यं नैवेद्यं प्रतिगृह्यताम्॥
उत्तरापोशनम्–उत्तरापोशनार्थं ते दद्मि तोयं सुवासितम्। गृहाण मुमुखो भूत्वा अनन्ताय नमो नमः॥
करोद्वर्तनम्–करोद्वर्तनकं देव मया दत्तं हि भक्तितः। चारुचन्द्रप्रभं दिव्यं गृहाण जगदीश्वर॥
नारिकेलफलम्–इदं फलं मया देव स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥
ताम्बूलम्–पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्। कर्पूरैलासमायुक्तं ताम्बूलं प्रतिगृह्यताम्॥
दक्षिणाम्–हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥
प्रदक्षिणाम्–यानि कानि च पापानि जन्मान्तरकृतानि च। तानि तानि विनश्यन्ति प्रदक्षिण पदे पदे॥
नमस्कारम्–नमस्ते भगवन् भूयो नमस्ते धरणीधर। नमस्ते सर्वनागेन्द्र नमस्ते मधुसूदन॥
मन्त्रपुष्पम्–नमस्ते देवदेवेश नमस्ते गरुडध्वज। नमस्ते कमलाकान्त अनन्ताय नमो नमः॥
दोरकप्रार्थना–अनन्ताय नमस्तुभ्यं सहस्रशिरसे नमः। नमोस्तु पद्मनाभाय नागानां पतये नमः॥

अनन्तकामदः कामाननन्तो मे प्रयच्छतु। अनन्तो दोरूपेण पुत्र-पौत्रान् प्रवर्धतु॥

दोरकबन्धनम्—अनन्तसंसारमहासमुद्रमग्नं समभ्युद्धर वासुदेव।
अनन्तरूपे विनियोजयस्व ह्यनन्तसूत्राय नमो नमस्ते॥

जीर्णदोरकविसर्जनम्—नमः सर्वहितानन्त जगदानन्दकारक। जीर्णदोरममुं देव विसृजेऽहं तवाज्ञया॥

वायनम्—गृहाणेदं द्विजश्रेष्ठ वायनं दक्षिणायुतम्। त्वत्प्रसादादहं देव मुच्येयं कर्मबन्धनात्॥
प्रतिगृह्णन् द्विजश्रेष्ठ अनन्तफलदायक। पक्वान्नफलसंयुक्तं दाक्षणां घृतसंयुतम्॥
वायनं द्विजवर्याय दास्यामि व्रतपूर्तये॥

जीर्णदोरकदानम्—अनन्तः प्रतिगृह्णाति अनन्तो वै ददाति च। अनन्तस्तारकोभाभ्यामनन्ताय नमो नमः॥
ततो यथाशक्तिः ब्राह्मणान् भोजयेत्॥ अनेन कृतपूजनेन श्रीमदनन्तः प्रीयताम्॥

इति अनन्तपूजाविधि समाप्ता।

अनन्त-व्रतकथा

सूत उवाच–पुरा तु जाह्नवी तीरे धर्मे धर्मपरायणः । जरासन्धवधार्थाय राजसूतमुपाक्रमत् ॥१॥
कृष्णेन सह धर्मोऽसौ भीमार्जुनसमन्वितः । यज्ञशालामकुरुत नानारत्नोपशोभिताम् ॥२॥
मुक्ताफलसमाकीर्णामिन्द्रालयसमप्रभाम् । यज्ञार्थं भूपतीन् सर्वान् समानीय प्रयत्नतः ॥३॥
गान्धारीतनयो राजा तदानीं नृपनन्दनः । दुर्योधन इति ख्यातः समागच्छन्मखालयम् ॥४॥
दृष्ट्वा दुर्योधनस्तत्र प्राङ्गणे जलसन्निभम् । ऊर्ध्वं कृत्वा तु वस्त्राणि तत्रागच्छच्छनैः शनैः ॥५॥

श्रीगणेशाय नमः ॥ शौनकादि ऋषिहरू प्रति सूतजी आज्ञा गर्दछन् कि कोही कालमा गङ्गाजीका तीरमा धर्मपरायण महात्मा राजा युधिष्ठिरले जरासन्ध वधका निम्ति राजसूय यज्ञ गर्न आरम्भ गर्दा भए ।१॥ कृष्ण, भीम, अर्जुनले सहित भई नाना रत्नले शोभायमान भएको त्यहाँ यज्ञशाला रचना गर्दा भए ॥२॥ मोतीका गुच्छाहरूले शोभिएकी त्यो यज्ञशाला राजा इन्द्रको महल जस्तो देखिई; बहाँपछि सम्पूर्ण भूपतिहरूलाई निमन्त्रणा गरे ॥३॥ हे नृपनन्दन ! गान्धारी-पुत्र राजा दुर्योधन त्यो यज्ञशालामा आए ॥४॥ बहाँपछि आँगन (जमीन) लाई पानीले भरिए जस्तो देखेर दुर्योधन आफूले लगाएको वस्त्रहरू उचाली बिस्तारै आउँदा भए ॥५॥ दुर्योधनले वस्त्र उचालेको देखेर द्रौपदी-

स्मितवक्त्राश्च तं दृष्ट्वा द्रौपद्यादिवराङ्गनाः । दुर्योधनस्ततो गच्छन् जलमध्ये पपात ह ॥६॥
पुनः सर्वे नृपाश्चैव ऋषयश्च तपोधनाः । उपहासं च चक्रुस्ता द्रौपद्यादिसुलोचनाः ॥७॥
महाराजाधिराजोऽसौ महाक्रोधपरायणः । विनिर्गतः स्वकं राष्ट्रं मातुलेन वृतो नृपः ॥८॥
तस्मिन्काले तु शकुनिः प्रोवाच मधुरं वचः । मुञ्च राजन्! महारोषं पुरतः कार्यगौरवात् ॥९॥
द्यूतोपक्रमणेनैव सर्वं राज्यमवाप्स्यसि । गन्तुमुत्तिष्ठ राजेन्द्र! सत्रस्य सदनं प्रति ॥१०॥
तथेत्युक्त्वा महाराजः समागच्छन्मखालयम् । विनिवृत्य मखं जग्मुर्नृपाः सर्वे स्वकं पुरम् ॥११॥
ततो दुर्योधनो राजा समागत्य गजाह्वयम् । आनीय पाण्डुपुत्रांश्च धर्मभीमार्जुनान्वरान् ॥१२॥

हरूले आश्चर्य मानी हँस्सी गरे । वहाँबछि दुर्योधन हिंड्दा-हिंड्दै जलका मध्यमा पछाडि ॥ ६ ॥ त्यसपछि सम्पूर्ण राजाहरू, ऋषिहरू र द्रौपद्यादि सुलोचना स्त्रीहरू पनि सबै हाँस्ता भए ॥७॥ महाराजाधिराज दुर्योधन महाक्रोधले युक्त भइ आफ्ना मामालाई साथ लिई आफ्ना घरतर्फ जाँदाभए ॥ ८ ॥ मामा शकुनीले भने—हे राजन्! यो ठूलो रिस त्याग गर र अगाडिको कार्य साधना गर ॥ ९ ॥ जूवाले सम्पूर्ण राज्य प्राप्त होला; हे राजेन्द्र! यदि यज्ञशालामा जाने इच्छा भए जाऊँ ॥१०॥ हुन्छ भनी दुर्योधन यज्ञशालामा आउदाभए । यज्ञ समाप्त गरी सम्पूर्ण राजाहरू आफ्ना-आफ्ना नगरतर्फ जाँदा भए ॥११॥ वहाँपछि राजा दुर्योधनले पनि हस्तिनापुर आई पाण्डवहरूलाई डाकेर जूवाको

द्यूतेनैव जिताः सर्वे पाण्डवा वीतकल्मषाः। ततोऽरण्यान्तरे गत्वा वर्तन्ते वनचारिणः ॥१३॥
ततो वृत्तान्तमाकर्ण्य भ्रातृभिः सह पाण्डवम्। युधिष्ठिरं द्रष्टुमनाः कृष्णोऽगाच्छगदीश्वरः॥१४॥
सूत उवाच–अरण्ये वर्तमानास्ते पाण्डवा दुःखकर्षिताः। कृष्णं दृष्ट्वा महात्मानं प्रणिपत्य तमब्रुवन्॥१५॥
युधिष्ठिर उ०–अहं दुःखी हि संजातो भ्रातृभिः परिवारितः। कथं मुक्तिर्वदास्माकमनन्ताद्दुःखसागरात्॥
कं देवं पूजयिष्यामि राज्यं प्राप्स्याम्यनुत्तमम्। अथवा किं व्रतं कुर्यात्त्वत्प्रसादाद्धवेद्धितम्। १७॥
श्रीकृष्ण उवाच–अनन्तव्रतमस्त्येकं सर्वपापहरं शुभम्। सर्वकामप्रदं नृणां स्त्रीणां चैव युधिष्ठिर! १८॥

आरम्भ गर्दामए ॥१२॥ जूवाको आरम्भ गरी जूवैले राज्य प्राप्त गरे। जूवैले जीतिएका पाण्डवहरू दुःखले पूर्ण भए ॥१३॥ यहाँपछि अघोर वनमा गई वनचारी भएर रहन लागे। यो वृत्तान्त सुनी युधिष्ठिरसित भेट गर्ने इच्छाले परमात्मा श्रीकृष्ण जाँदामए॥ १४॥ सूतजी आज्ञा गर्छन्–हे ऋषीश्वर! वनमा बसेका दुःखले दुर्बल भएका पाण्डवहरू महात्मा श्रीकृष्णलाई आएको देखी दण्डवत् गरेर भन्न लाग्दामए ॥१५॥ राजा युधिष्ठिर आज्ञा गर्नुहुन्छ—हे भगवन्! म भाइहरूले सहित मै यहाँ दुःखमा प्राप्त भएँ। अनन्त दुःख-सागरबाट कसरी मुक्ति पाउँला ॥१६॥ कुन देवताको पूजा गर्दा जसले आफ्नो राज्य प्राप्त हुनस् अथवा कुन व्रत गरूँ जो तिम्रा प्रसादले भलाई हित हुनस्॥ १७॥ श्रीकृष्ण आज्ञा गर्नुहुन्छ—हे युधिष्ठिर! स्त्री-पुरुष दुवैलाई हित, सम्पूर्ण कामना परिपूर्ण गर्ने र सम्पूर्ण पाप हरण गर्ने अनन्त व्रत छ ॥१८॥ भाद्रपद

शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे भवेत्। तस्यानुष्ठानमात्रेण सर्वपापं व्यपोहति ॥१९॥
युधिष्ठिर उ०-कृष्ण कोऽयमनन्तेति प्रोच्यते यस्त्वया विभो! किं शेषनाग आहोस्विदनन्तस्तक्षकस्मृतः ॥
परमात्माथवानन्त उताहो ब्रह्म गीयते। क एषानन्तसंज्ञो वै तथ्यं मे ब्रूहि केशव ॥२१॥
श्रीकृष्ण उवाच-अनन्त इत्यहं पार्थ मम रूपं निबोधय। आदित्यादिग्रहात्मासौ यः काल इति पठ्यते ॥२२॥
कलाकाष्ठा-मुहूर्तादि-दिन-रात्रि-शरीरवान्। पक्षमासर्तुवर्षादि-युगकालव्यवस्थया ॥२३॥
योऽयं कालो मया ख्यातः सोनन्त इति कीर्त्यते। सोऽहं कृष्णोऽवतीर्णोऽत्र भूभारोत्तारणाय च ॥२४॥
दानवानां वधार्थाय वसुदेवकुलोद्भवम्। मां विद्धि सततं पार्थ! साधूनां पालनाय च ॥२५॥

शुक्लपक्षको चतुर्दशीमा यो व्रत गर्नाले सम्पूर्ण पाप नष्ट हुन्छ ॥ १९ ॥ तब युधिष्ठिर प्रश्न गर्दछन्—हे कृष्ण! अनन्त को हुन्? जो हजुरबाट आज्ञा भयो—के शेषनाग हुन्? अथवा तक्षक सर्प अनन्त कहिन्छन्? ॥ २० ॥ अथवा परमात्मालाई अनन्त भन्दछन्! या परब्रह्म अनन्त कहिन्छन्! हे केशव! अनन्त को हो? सो मलाई आज्ञा होस् ॥ २१ ॥ श्रीकृष्णजी आज्ञा गर्नुहुन्छ—हे पार्थ! अनन्त भन्ने मेरै रूप हो; चादित्य ग्रहमा जो काल कहिन्छ ॥२२॥ घड़ी, आधा दिन, रात, पक्ष, मास, ऋतु, वर्ष, युग शरीरवान् यो जो कालको व्यवस्था छ ॥२३॥ त्यही काललाई अनन्त भन्दछन्। सोही कालरूप अनन्त म कृष्णावतार मइ भू-भार हरण गर्नाका निमित्त ॥२४॥ कौरवहरूको वधका निम्ति

अनादिमध्यनिधनं कृष्णं विष्णुं हरिं शिवम् । वैकुण्ठं भास्करं सोमं सर्वव्यापिनमीश्वरम् ॥२६॥
विश्वरूपं महाकालं सृष्टिसंहारकारकम् । प्रत्ययार्थं महारूपं फाल्गुनाय प्रदर्शितम् ॥२७॥
पूर्वमेव महाबाहो योगिध्येयमनुत्तमम् । विश्वरूपमनन्तं च यस्मिन्निन्द्राश्चतुर्दश ॥२८॥
वसवो द्वादशादित्या रुद्रा एकादश स्मृताः । सप्तर्षयः समुद्राश्च पर्वताः सरितोत्तमाः ॥२९॥
नक्षत्राणि दिशो भूमिः पातालं भूर्भुवादिकम् । मा कुरुष्वात्र सन्देहः सोऽहं पार्थ न संशयः ॥३०॥
युधिष्ठिर उ०-अनन्तव्रतमाहात्म्यं विधिं वद विदांवर । किं पुण्यं किं फलं चास्य किं दानं कस्य पूजनम् ॥

वसुदेवको कुलमा उत्पन्न भएको साधुलाई पालन गर्ने भलाई जान्नुहोला ॥ २५ ॥ आदि मध्य नाश जसको छैन; कृष्ण, विष्णु, हरि, शिव, वैकुण्ठ, भास्कर, सोम सर्वव्यापी ईश्वर ॥२६॥ तथापि विश्वरूप महाकालरूप सृष्टि नाशकर्ता इत्यादि रूप मैले ज्ञान निमित्त दर्शन दिलाएको हुँ ॥२७॥ हे महाबाहो ! पहिले यी योगीहरूले ध्यान गर्ने योग्य अति उत्तम संसारको रूप जसमा चौध इन्द्र रहन्छन् यस्तै रूपलाई अर्जुनले देखेका छन् ॥२८॥ अष्टवसु द्वादशादित्य एकादश रुद्र नारदादि सप्तऋषि तथा सप्त समुद्र र पर्वत नदी ॥ २९ ॥ नक्षत्र, दिशा, भूमि, पाताल भूः भुवादि सप्तलोक इत्यादि सब मै हुँ यसमा केही सन्देह नगर्नुहोस् ॥३०॥ यो सुनी युधिष्ठिरजी प्रश्न गर्दछन्-हे कृष्ण ! यो अनन्त व्रतको विधि के हो ? फल के हो ? यो व्रतको के दान हो ? कस्ताको पूजन गर्ने हो ॥ ३१ ॥ आदिमा कसले बतायो ? यो विस्तार मऊपर करुणा

केन चैतत्पुरा चोक्तं मर्त्ये केन प्रकाशितम्। एवं सविस्तरं सर्वं ब्रूह्यनन्तव्रतं मम ॥३२।
श्रीकृष्ण उ०-आसीत्पुराकृतयुगे सुमन्तुर्नाम वै द्विजः। वशिष्ठगोत्रसंभूतः सुरूपां च भृगोः सुताम् ॥३३॥
दीक्षानाम्नीं चोपयेमे वेदोक्तविधिना नृप। तस्याः कालेन सञ्जाता दुहिताऽनन्तलक्षणा ॥३४॥
शीला नाम्नी सुशीला सा वर्धते पितृवेश्मनि। माता च तस्याः कालेन ज्वरदाहेन पीडिता ॥३५॥
विनष्टा सा नदीतीरे ययौ स्वर्गं पतिव्रता। सुमन्तुस्तु ततोऽन्यां वै धर्मपुंसः सुतां पुनः ॥३६॥
उपयेमे विधानेन कर्कशां नाम नामतः। दुःशीलां कर्कशां चण्डीं नित्यं कलहकारिणीम् ॥३७॥

गरी सम्पूर्ण आज्ञा हवस् ॥ ३२ ॥ श्रीकृष्णजी आज्ञा गर्नुहुन्छ–हे युधिष्ठिर ! अघि सत्ययुगमा वशिष्ठ गोत्रमा उत्पन्न सुमन्तु नामका ब्राह्मण भए। तिनको रूपले युक्त भएकी भृगुऋषिकी कन्यासँग ॥३३॥ जसको नाउँ दीक्षा थियो वेदोक्त विधिले विवाह भयो। तब केही काल व्यतीत भएपछि ती दीक्षाकी अनन्त लक्षण भएकी कन्या उत्पन्न भइन् ॥३४॥ ती कन्याको नाम शीला भनी राखे। ती शीला अति सुशीला थिइन् आमा बाबुका घरमा बढ्न लागिन्। ती शीलाकी आमा ज्वरदाहले पीडित भएर ॥ ३५ ॥ नदीका तीरमा विनष्ट भई स्वर्ग जाँदी भइन्। बहाँपछि सुमन्तुले पनि अर्की धर्मपुरुषको ॥३६॥ कर्कशा नाम भएकी कन्यासँग विवाह गरे। तो बडी दुःशीला कर्कशा चण्डी नित्यै कलह-प्रिया थिइन् ॥३७॥ ती शीला पनि बाबुका घरमा ढोका तोरण खम्बा इत्यादि सिंगार गर्ने गृहकार्यमा कुशल भइन् ॥ ३८ ॥ नीला पहेंला

सापि शीला पितुर्गेहे गृहार्चनपरा बभौ। कुड्यस्तम्भबहिर्द्वार-देहली-तोरणादिषु ॥३८॥
वर्णकैश्चित्रमकरोन्नीलपीतसितासितैः । स्वस्तिकैः शङ्खपद्मैश्च सार्चयन्तं पुनः पुनः ॥३९॥
ततो काले बहुगते कौमारवशवर्तिनी। एवं सा वर्धते शीला पितृवेश्मनि मङ्गला ॥४०।
पितृ दृष्टा तदा सापि स्त्रीचिह्ना यौवने स्थिता। तां दृष्ट्वा चिन्तयामास वराननुगुणान्भुवि ॥
कस्मै देया मया कन्या विचार्येति सुदुःखितः ॥४१॥
एतस्मिन्नेव काले तु मुनिर्वेदविदांवरः । कन्यार्थी चागतः श्रीमान् कौडिन्यो मुनिसत्तमः ॥४२॥
उवाच रूपसम्पन्नां त्वदीयां तनयां वृणे। पिता ददौ द्विजेन्द्राय कौडिन्याय शुभे दिने ।।४३॥

सेता काला इत्यादि वर्णका चित्र गर्दो भइन् । स्वस्तिक शंख कमल इत्यादि बारम्बार बनाउँथिन् ॥ ३९ ॥ तहाँ उप्रान्त धेरै काल बितेपछि कुमार अवस्थामा प्राप्त भएर पिताकै घरमा बढ़दोमइन् ॥ ४० ॥ त्यसपछि पिताले स्त्री-चिह्न यौवन इत्यादिले युक्त भएकी शीलालाई देखी चिन्तामा प्राप्त भएर वर खोज्न लाग्दा भए। अब कसलाई मेरी कन्या दिउँ भन्ने खोजमा चिन्ताले आकुल भए ॥ ४१ ॥ यस्तै बखतमा श्रेष्ठ वेद जान्ने स्त्रीको इच्छा गर्ने बड़ा कान्तिवान् कौण्डिन्य ऋषि आए ॥४२॥ सुमन्तुका घर आई भने–हे सुमन्तु ! कन्या रूपले युक्त भएकी शीलालाई म माग्दछु । त्यसपछि शुभ दिनमा ब्राह्मणश्रेष्ठ कौडिन्य ऋषिलाई सुमन्तुले आफ्नी कन्या दिए ॥ ४३ ॥ हे युधिष्ठिर ! गृहस्थोक्त

गृह्योक्तविधिना पार्थ ! विवाहमकरोत्तदा । मङ्गलाचारनिर्घोषं तत्र कुर्वन्ति योषितः ॥४४॥
ब्राह्मणाः स्वस्तिवचनं जयघोषं च वन्दिनः । निर्वर्त्योद्वाहिकं सर्वं प्रोक्तवान् कर्कशां द्विजः ॥४५॥
सुमन्तुरुवाच–किञ्चिद् द्रव्यादिकं देयं जामातुः परितोषकम्। यच्छ्रुत्वाकर्कशा क्रुद्धा प्रोत्सार्य गृहमण्डनम्॥
पेटके सुस्थिरं बद्धा गम्यतामिति चाब्रवीत्। भोज्यावशिष्टचूर्णेन पाथेयं च चकार सा ॥४७॥
उवाच वित्तं नैवास्ति गृहे पश्य यदि स्थितम्। तच्छ्रुत्वा विमनाः पार्थ संयतात्मा मुनिस्तदा॥४८॥
कौडिन्योपि विवाह्यैनां पथि गच्छञ्छनैः शनैः। शीलां सुशीलामादाय नवोढां गोरथेन हि॥४९॥

विधिले विवाह गरे र स्त्रीहरूले पनि मङ्गलाचार गरे ॥ ४४ ॥ ब्राह्मणहरूले स्वस्तिवाचन गरे तथा बन्दीहरूले जयघोष गरे । सबै विवाहको कामदेखि निवृत्त भई सुमन्तु आफ्नी स्त्री कर्कशासँग भन्नलागे ॥ ४५ ॥ हे स्त्री ! अब ज्वाईँलाई संतोषका निम्ति केही द्रव्यहरू दिनुपर्छ । आफ्ना पतिका यस्ता वचन सुनी कर्कशा क्रोधले युक्त भएर सम्पूर्ण पदार्थ एकत्र गरी ॥ ४६ ॥ पेटकमा बढिया तवरसँग बाँधी त्यसपछि आफ्ना घर जाऊ भनिन् । खाइसकेको अवशिष्ट अन्नको धूलो जो छ त्यै तिनलाई बाटामा सामल बनाई दिइन् ॥ ४७ ॥ यहाँपछि सुमन्तुसँग भनिन्–घरमा धन आदि पदार्थ केही छैन यदि छ भने हेर–हे युधिष्ठिर ! आफ्नी पत्नीका यस्ता वचन सुनी सुमन्तु बहुत दुःखित भए ॥४८॥ कौडिन्य ऋषि पनि युवा अवस्था भएकी सुशीलालाई विवाह गरी बैलगाडामा बसेर गए ॥ ४९ ॥ बाटामा ती कौडिन्य ऋषि यमुना नदी

ददर्श यमुनां पुण्यां तामुत्तीर्य तटे रथम्। संस्थाप्यावश्यकं कर्तुं गतः शिष्यान्नियुज्य वै ॥५०॥
मध्याह्ने भोज्यवेलायां समुत्तीर्य सरित्तटे। ददर्श शीला सा स्त्रीणां समूहं रक्तवाससाम् ॥५१॥
चतुर्दश्यामर्चयन्तं भक्त्या देवं जनार्दनम्। उपगम्य शनैः शीला पप्रच्छ स्त्रीकदम्बकम् ॥५२॥
आर्याः किमेतन्मे ब्रूत किन्नाम व्रतमीदृशम्। ता ऊचुर्योषितस्तां तु शीलां शीलविभूषणाम्॥५३॥
अनन्तव्रतमेतद्धि व्रतेऽनन्तस्तु पूज्यते। साऽब्रवीदहमप्येतत्करिष्ये व्रतमुत्तमम् ॥५४॥
विधानं कीदृशं तत्र किं दानं कोऽत्र पूज्यते। स्त्रिय ऊचुः-शीले तदन्नप्रस्थस्य पुंनाम्ना संस्कृतस्य च ॥

देखेर गाडा अड्याई शिष्यहरूलाई रथ सुम्पी आफू नित्यकर्म गर्न गए ॥ ५० ॥ मध्याह्नको समया नदीका तीरमा आएका रक्त वस्त्र धारण गरेका स्त्रीहरूलाई शीलाले देखती भइन् ॥ ५१ ॥ चतुर्दशीमा भगवान् जनार्दनको पूजा गरिरहेका थिए। शीलाले पनि विस्तार-विस्तार ती स्त्रीहरूका नगीच गएर सोधिन्—॥५२॥ हे श्रेष्ठ स्त्री हो! यो के गर्दछौ? यस व्रतको नाम के हो? मेरा निम्ति कृपापूर्वक भलाई बताऊ। शीलाका यस्ता वचन सुनी स्त्रीहरू शीले छन् गहना जसका यस्ती शीलाकन भन्दाभए ॥ ५३ ॥ हे शीले! यो अनन्तको पूजा हो। ती स्त्रीहरूका यस्ता वचन सुनी शीला भन्दछिन्–म पनि यो व्रत गर्छु ॥ ५४ ॥ यो व्रतको विधान के हो? के दान गर्नुपर्छ? कुन देवताको पूजा गर्नुपर्छ? यस्ता वचन सुनी सबै स्त्रीहरू भन्दछन्–हे शीले! एक प्रस्थ अन्नको पुरुष सदृश जसलाई पुं भन्दछन् त्यो बनाउनू ॥ ५५ ॥

अर्धं विप्राय दातव्यमर्धमात्मनि भोजनम् । शक्त्या च दक्षिणां दद्याद्भक्तिशाठ्यविवर्जितः॥५६॥
कर्तव्यं च सरित्तीरे सदानन्तस्य पूजनम् । शेषं कुशमयं कृत्वा वंशपात्रे निधाय च ॥५७॥
स्नात्वाऽनन्तं समभ्यर्च्य मण्डले गन्धदीपकैः । पुष्पैर्धूपैश्च नैवेद्यैर्नाना-पक्वान्न-संयुतैः ॥५८॥
तस्याग्रतो दृढं न्यस्य कुङ्कुमाक्तं सुदोरकम् । चतुर्दशग्रन्थियुतं गन्धद्यैरर्चयेच्छुभैः ॥
ततस्तु दक्षिणे पुंसां स्त्रीणां वामे करे न्यसेत् ॥५९॥
अनन्तसंसारमहासमुद्रे मग्नं समभ्युद्धर वासुदेव ! अनन्तरूपे विनियोजयस्व ह्यनन्तसूत्राय नमो नमस्ते ॥

र त्यो पुंको दुइ भाग गरी एक भाग ब्राह्मणलाई दिनू अर्को भाग आफूले भोजन गर्नू र यथाशक्ति दक्षिणा दिनू ॥ ५६ ॥ नदी किनारमा अनन्तको पूजा गर्नू ; कुशको शेषनाग बनाई वंशका पात्रमा स्थापना गरी ॥ ५७ ॥ ती शेषलाई आवाहन प्राणप्रतिष्ठा गरेर स्नान गराबोस् वेदीमा चन्दन धूप-दीप बहुत प्रकारका नैवेद्य अर्पण गरोस् ॥ ५८ ॥ त्यसका अगाडि कुंकुमले रँगाएको डोरो चौध ग्रन्थिले युक्त पारी चन्दन अक्षता फूलले पूजा गर्नू ; त्यसपछि पुरुषका दाहिना हातमा र स्त्रीका बायाँ हातमा बाँध्नू ॥५९॥ बाँध्दाखेरि यो मन्त्र पढ्नू—हे अनन्त ! संसार जो महासमुद्र छ उसमा म डुब्दैछु; मेरो उद्धार गर हे वासुदेव ! अनन्तरूपमा युक्त गर। यस्तो जो अनन्त सूत्र छ उसलाई मेरो नमस्कार छ ॥६०॥ यो मन्त्र पढी डोरो बाँधी हरि-कथा श्रवण गर्नू ; विश्वरूपी नारायण अनन्तको ध्यान गर्नू ॥ ६१ ॥ पूजा समाप्त

अनेन दोरकं बद्ध्वा कथां श्रुत्वा हरेरिमाम् । ध्यात्वा नारायणं देवमनन्तं विश्वरूपिणम् ॥६१॥
भुक्त्वा चान्ते व्रजेद्वेश्म भद्रे प्रोक्तं व्रतं तव । श्रीकृष्ण उवाच-एवमाकर्ण्य राजेन्द्र प्रहृष्टेनान्तरात्मना ॥
सापि चक्रे व्रतं शीला करे बद्ध्वा सुदोरकम् । पाथेयमर्धं विप्राय दत्वा भुक्त्वा स्वयं ततः ॥६३॥
पुनर्जगाम संहृष्टा गोरथेन स्वकं गृहम् । भर्त्रा सहैव शनकैः प्रत्ययस्तत्क्षणादभूत् ॥६४॥
तेनानन्तव्रतेनास्य बभौ गोधनसंकुलम् । गृहाश्रमं श्रिया जुष्टं धनधान्यसमन्वितम् ॥६५॥
आकुलं व्याकुलं रम्यं सर्वदातिथिपूजनैः । सापि माणिक्यकाञ्चीभिर्मुक्ताहारैर्विभूषिता ॥६६॥

भएपछि स्त्रीहरू भन्दछन्–हे शीले ! आफ्ना घर जाऊ; हे भद्रे ! यो व्रत विधान तिमीलाई हामीले बतायौं । श्रीकृष्णजी आज्ञा गर्नुहुन्छ–हे युधिष्ठिर ! ती स्त्रीहरूको यस्ता वचन जब सुनिन् तब अतिशय आनन्द भई ॥६२॥ व्रत गर्दी भइन् । हातमा डोरो बाँधी आमाले बाटाका निम्ति जो अन्न दिएकी थिइन् त्यसमा आधा त ब्राह्मणलाई दिइन् र आधा आफुले भोजन गरिन् ॥६३॥ फेरि ती शीला फर्केर बैलगाडीमा बसिन् र पतिसँग बिस्तार बिस्तार आफ्ना घर गइन् । व्रतको प्रभाव पनि उसै बेलादेखि हुनलाग्यो ॥ ६४ ॥ त्यस अनन्त व्रतका प्रभावले सम्पन्न भई धन धान्य लक्ष्मीले शीलाको गृह पूर्ण भयो ॥ ६५ ॥ अतिथिलाई पूजा गर्दा शीलालाई कुनै समयमा पनि श्रम प्राप्त हुँदैनथ्यो । शीला पनि मोती माणिक्यका हारले विभूषित हुँदी भइन् ॥ ६६ ॥ धन-पुत्रले युक्त भई देवताकी स्त्री समान भइन् । सावित्री समान पति-

देवाङ्गनेव सम्पन्ना सावित्रीप्रतिमाभवत्। विचचार गृहे भर्तुः समीपे सुखरूपिणी ॥६७॥
कदाचिदुपविष्टाया दृष्टो बद्धः सुदोरकः। शीलाया हस्तमूले तु भर्त्रा तस्या द्विजन्मना ॥६८॥
किमिदं दोरकं शीले! मम वश्याय कल्पितम्। धृतं सुदोरकं त्वेतत्किमर्थं ब्रूहि तत्त्वतः ॥६९॥
शीलोवाच—यस्य प्रसादात्सकला धनधान्यादिसम्पदः। लभ्यते मानवैश्चापि सोऽनन्तोऽयं मया धृतः ॥
शीलायास्तद्वचः श्रुत्वा भर्त्रा तेन द्विजन्मना। श्रीमदान्धेन कौरव्य साक्षेपं त्रोटितस्तदा ॥७१॥
कोऽनन्त इति मूढेन जल्पता पापकारिणा। क्षिप्तं ज्वालाकुले वह्नौ हाहाकृत्वा प्रधावती ॥७२॥
शीला गृहीत्वा तत्सूत्रं क्षीरमध्ये समाक्षिपत्। तेन कर्मविपाकेन सा श्री तस्य क्षयं गता ॥७३॥

व्रता भइन् र आफ्ना पतिका साथ विचरण गर्न लाग्दी भइन् ॥ ६७ ॥ कुनै कालमा शीलाका पति कौडिन्य ऋषिले शीलाका हातया त्यो अनन्तको डोरो बाँधिएको देखे र ॥६८॥ हे शीला! के यो डोरो मलाई वश गर्न बाँधेकी हौ या केका निम्ति यो डोरो बाँध्यौ सो यसको कारण मलाई बताऊ ॥ ६९ ॥ यस्ता वचन सुनी शीला भन्दछिन्—हे स्वामी! जसका प्रसादले सम्पूर्ण प्राणी अष्टसिद्धि नवनिधि इत्यादि सम्पति पाउँछन्; उही अनन्तलाई मैले धारण गरेकी हुँ ॥ ७० ॥ शीलाका यस्ता वचन सुनी लक्ष्मी अन्धो भएका तिनले त्यो डोरोलाई छिनाल्दा भए ॥७१॥ अनन्त भनेको को हो भन्दै ती मूढले त्यो डोरोलाई बल्दो अग्निमा हालिदिए। तब हा हा! गरी दौडी ॥ ७२ ॥ शीलाले त्यो अनन्त सूत्र अग्निबाट झिकी दूधमा हालिन्। त्यस कर्मका विपाकले तिनको श्री नष्ट भयो ॥ ७३ ॥ उनका गाई-गोरूहरू पनि

गोधनं तस्करैर्नीतं गृहं दग्धं धनं गतम्। यद्यथैवागतं गेहे तत्तथैव पुनर्गतम्।७४॥
स्वजनैः कलहो नित्यं बन्धुभिस्ताडनं तथा। अनन्ताक्षेपदोषेण दारिद्र्यं पतितं गृहे॥७५॥
न कश्चिद्वदते लोकस्तेन सार्द्धं युधिष्ठिर! शरीरेणातिसन्तप्तो मनसाऽप्यतिदुःखितः॥७६॥
निर्वेदं परमं प्राप्तः कौडिन्यः प्राह तां प्रियाम्। कौडिन्य उवाच-शीले ममेदमुत्पन्नं सहसा शोककारणम्॥
येनातिदुःखमस्माकं जातः सर्वधनक्षयः। स्वजनैः कलहो गेहे न कश्चिन्मां प्रभाषते॥७८॥
शरीरे नित्यसंतापः खेदश्चेदसि दारुणः। जानासि दुर्नयः कोऽत्र किं कृत्वा सुकृतं भवेत्॥७९॥

चोरले चोरेर लगे; घर आगाले डढायो र जो पदार्थ जुन प्रकारले आयो उही प्रकारसँग फेरि गयो॥७४॥ आफ्ना बन्धुवर्गसँग सधैं झगडा र कुट-पीट हुन लाग्यो। अनन्तको डोरो छिनालेको घरमा दारिद्र्यले प्रवेश गऱ्यो॥ ७५॥ श्रीकृष्णजी आज्ञा गर्नुहुन्छ–हे युधिष्ठिर! उनीसँग कोही मनुष्य केही पनि सम्भाषण नगर्ने भए। तब ती कौंडिन्य ऋषि शरीरले पनि अति दुब्ला र मन पनि अति ग्लानियुक्तका भए॥७६॥ औ ती कौंडिन्य ऋषि परम दुःखमा प्राप्त भै फेरि शीलासँग भन्नलागे–हे शीले! मलाई अकस्मात् यो दुःखको के कारण भयो? ॥७७॥ जेले मलाई अति दुःख प्राप्त भयो; सम्पूर्ण धन-नाश भयो; कुटुम्बहरूमा झगडा हुन्छ; कोही मनुष्य मसँग वार्ता पनि गर्दैन॥ ७८॥ मेरा शरीरमा पीडा र चित्तमा खेद भइरहन्छ हे शीले! तिमी केही जान्दछौ कि मबाट के अपराध भयो? के गर्नाले कल्याण होला?

प्रत्युवाचाथ तं शीला सुशीला शीलमण्डना। शीलोवाच-प्रायोऽनन्तकृताक्षेपपापसम्भवजं फलम् ॥८०॥
भविष्यति महाभाग! तदर्थं यत्नमाचर। एवमुक्तः स विप्रर्षि संस्मरन् मनसा हरिम् ॥८१॥
निर्वेदान्निर्जगामाथ कौण्डिन्यः प्रयतो वनम्। तपसे कृतसङ्कल्पो वायुभक्षो द्विजोत्तमः ॥८२॥
मनसा ध्याय चानन्तं क्व द्रक्ष्यामि च तं विभुम्। यस्य प्रसादात्सञ्जातमाक्षेपान्निधनं गतम् ॥८३॥
धनादिकं ममातीव सुखदुःखप्रदायकम्। एवं सञ्चिन्तयन् सोऽथ बभ्राम गहने वने ॥८४॥
तत्रापश्यन्महाचूतं पुष्पितं फलितं द्रुमम्। वर्जितं पक्षिसङ्घातैः कीटकोटिसमावृतम् ॥८५॥

॥७९॥ यस्ता पतिका वचन सुनी दिव्य स्वभाव भएकी शीले छ आभूषण जसको यस्ती ती शीला कौंडिन्य ऋषिसँग बोल्दो भइन्–हे स्वामी! तपाईंले अनन्तको डोरो छिनालनु भयो। त्यसै पापले उत्पन्न भएको यो फल हो ॥८०॥ हे महाभाग! द्रव्यादि सम्पूर्ण पदार्थ हुनेछन् तर उसका निमित्त उपाय गर्नुहोस्। यस्ता शीलाका वचन सुनी ती कौंडिन्य ऋषि अनन्त देवका शरणमा गए ॥ ८१ ॥ कौंडिन्य ऋषि परम दुःखित भै तप गर्नाका निम्ति सङ्कल्प गरी वनमा गए र वहाँ वायु भक्षण गरी रहे ॥ ८२ ॥ औ मनले विचार गर्दछन्—ती जगदीश्वर अनन्तको दर्शन म कहाँ पाउँला? जो प्रसन्न हुनाले द्रव्यादि पदार्थ मिल्यो र उनको आक्षेप गर्नाले नाशमा प्राप्त भयो ॥ ८३ ॥ जो धनादि पदार्थ मलाई सुख दिन्थे तिनै पदार्थ यस बखत मलाई महादुःख दिन्छन्। यो विचार गरी तो कौंडिन्य ऋषि निर्जन वनमा घुम्दा भए

तमापृच्छद्द्विजोऽनन्तः क्वचिद्दृष्टो महातरो! ब्रूहि सौम्य ममातीव दुःखं चेतसि वर्तते ॥८६॥
सोऽब्रवीद्भद्र नानन्तः क्वचिद्दृष्टो मया द्विज! एवं निराकृतस्तेन सञ्जगामाथ दुःखितः ॥८७॥
क्व द्रक्ष्यामीति गच्छन् स गामपश्यत् सवत्सकाम्। वनमध्ये प्रधावन्तीमितश्चेतश्च पाण्डव ॥८८॥
सोऽब्रवीद्धेनुके ब्रूहि यद्यनन्तस्त्वयेक्षितः। गौरुवाचाथ कौण्डिन्यं नानन्तं वेद्म्यहं द्विज ॥८९॥
ततो व्रजन् ददर्शाऽग्र वृषभं शाद्वलस्थितम्। दृष्ट्वा पप्रच्छ गोस्वामिन्ननन्तो वीक्षितस्त्वया ॥९०॥
वृषभस्तमुवाचेदं नानन्तो वीक्षितो मया। ततो व्रजन् ददर्शाग्रे रम्यं पुष्करिणीद्वयम् ॥९१॥

॥ ८४ ॥ उस वनमा कौंडिन्य ऋषिले आम्रको वृक्ष फलफूलले युक्त भएको देखे तर उसमाथि पक्षीहरूका समूह थिएनन्, उसका पुष्पमा पनि करोडौं कीरा परिरहेका थिए ॥ ८५ ॥ तब ता ती कौंडिन्य ऋषि त्यो वृक्षसँग सोद्धछन्–हे महावृक्ष! तँले कुनै ठाउँमा अनन्त देवलाई देखेको छस्? बता किनकि मेरो चित्तमा ठूलो दुःख छ ॥८६। त्यसपछि आम्र वृक्षले भने–हे कौंडिन्य ऋषि! मैले अनन्तलाई कुनै स्थानमा देखिन तब महादुःखमा प्राप्त भै अगाडि हिंड्दा भए ॥८७॥ श्रीकृष्णजी आज्ञा गर्नुहुन्छ—हे युधिष्ठिर! तिनी अनन्तका दर्शनको लालसा गर्दै जाँदा त्यही वनमा यताउति घुम्नलागेकी बाछाले सहित भएकी यौटी गाईलाई देखे ॥८८॥ तब कौंडिन्य ऋषि सोद्धछन्–हे धेनुक! तिमीले अनन्तलाई देखेकी छौ भने बताऊ। यस्तो बचन सुनी ती भन्दछिन्–हे द्विज! म अनन्तलाई जान्दिन ॥ ८९ ॥ त्यसपछि घाँसमा चर्न लागेकी बैललाई देखेर सोधे—हे गोस्वामिन्! तिमीले अनन्तलाई देखेका छौ? ॥९०॥ तब त्यो बैल भन्दछ–मैले अनन्तलाई देखेको

अन्योन्यजलकल्लोलैर्वीचिपर्यन्तसङ्गतम् । छन्नं कनककह्लारैः कुमुदोत्पलमण्डितम् ॥९२॥
सेवितं भ्रमरैर्हंसैश्चक्रैः कारण्डवैर्वकैः । ते अपृच्छद् द्विजोऽनन्तो युवाभ्यामुपलक्षितः ॥९३॥
ऊचतुस्ते पुष्करिण्यौ नानन्तो वीक्षितो द्विज! ततो व्रजन् ददर्शाग्रे गर्दभं कुञ्जरं तथा ॥९४॥
तावप्युक्तो द्विजेनेत्थं नेति ताभ्यां निवेदितम्। एवं स पृच्छन्नष्टाशस्तत्रैव निषसाद ह ॥९५॥
कौण्डिन्यो विह्वलीभूतो निराशो जीविते नृप ! दीर्घमुष्णं च निःश्वस्य पपात भुवि भारत । ९६॥
प्राप्तसंज्ञां वने तस्मिञ्जल्पन्नुत्थाय स द्विजः । नूनं त्यजाम्यहं प्राणानिति सङ्कल्प्य चेतसि ॥९७।

छन । यति सुनी कौंडिन्य ऋषि अगाडि गए र दुइ पुष्करिणीहरूलाई देखे ॥ ९१ । अन्योन्य जलको कल्लोलले विची पर्यन्त संगत कमल-कुमुदिनी तथा धेरै प्रकारका शोभाले युक्त ॥९२॥ भ्रमर हंस चक्रवाक इत्यादि जातिका पक्षीगणले युक्त भएका ती पुष्करिणीसँग कौंडिन्य ऋषिले सोद्धा भए—तिमीहरूले अनन्तलाई देखेथ्यौ ॥९३॥ तिनको यस्तो वाक्य सुनी पुष्करिणी (तलाऊ) ले जवाफ दिए—हे द्विज ! हामीले अनन्तलाई देखेका छैनौं । तब त्यहाँबाट अलि पर गई गधा र हात्तीलाई देखे ॥ ९४ ॥ कौंडिन्य ऋषिले तिनीसँग पनि सोधे—के तिमीले अनन्तलाई देखेथ्यौ ? तब तिनले जवाफ दिए—मैले अनन्तलाई देखिन । यस्तै गरी ती सोद्धथे तर तिनको आशा नष्ट भयो र वनमा बस्ता भए ॥ ९५ ॥ हे युधिष्ठिर ! कौंडिन्य ऋषि जीवनको आशा छोडी उष्णश्वास फेरेर आकुल भै भूमिमा पछारिए ॥ ९६ ॥

यावदुद्बन्धनं वृक्षे चक्रे तावद्युधिष्ठिर ! कृपयाऽनन्तदेवोऽस्य प्रत्यक्षं समजायत ॥९८॥
वृद्धब्राह्मणरूपेण इत एहीत्युवाच तम् । प्रगृह्य दक्षिणे पाणौ गुहायां प्रविवेश तम् ॥९९॥
स्वां पुरीं दर्शयामास दिव्यनारीनरैर्युताम् । तस्यां निविष्टमात्मानं दिव्यसिंहासने शुभे ॥१००॥
पार्श्वस्थं शंखचक्राब्जगदागरुडशोभितम् । दर्शयामास विप्राय विश्वरूपमनन्तकम् ॥१०१॥
विभूतिभेदैश्चानन्तै राजन्तममितौजसम् । कौस्तुभेन विराजन्तं वनमालाविभूषितम् ॥१०२॥
तं दृष्ट्वा देवदेवेशमनन्तमपराजितम् । वन्दमानो जगादोच्चैर्जयशब्दपुरःसरम् ॥१०३॥

अलिक बेरमा ती कौडिन्य उठेर प्राण-त्याग गर्न भनी सङ्कल्प गर्दाभए ॥ ९७ ॥ हे युधिष्ठिर ! जब रूखमा झुण्डिन भनी ठीक-ठाक परेथे तब अनन्तजी कृपा गरी प्रत्यक्ष भए ॥ ९८ ॥ वृद्ध ब्राह्मणको रूप धारण गरेका अनन्तले—हे द्विज ! यता आऊ भनी उनको हात समाती पर्वतका एक गुफामा प्रवेश गरे ॥९९॥ त्यसपछि आफ्नो शहर देखाए जो नाना रत्न र नारीहरूले युक्त भएको थियो त्यस पुरीमा प्रवेश गरी सिंहासनमा बसेर अनन्त भगवान्‌ले आफ्नो दर्शन दिंदाभए ॥ १०० ॥ शंख-चक्र-गदा-पद्म धारण गरेका पार्श्वमा गरुड भएका यस्तो विश्वरूपको दर्शन दिंदाभए ॥१०१॥ अनन्त विभूति ऐश्वर्यले युक्त सूर्यभन्दा पनि तेजस्वी कौस्तुभ मणि र वनमाला धारण गरेका यस्ता भगवान् अनन्तको विश्वरूप देख्ता भए ॥१०२॥ सम्पूर्ण देवताका पनि देवता कसै द्वारा पनि पराजित नहुने सम्पूर्ण पुरुषले पूज्य विश्वरूपको

पापे हं पापकर्माहं पापात्मा पापसम्भवः । त्राहि मां पुण्डरीकाक्ष! सर्वपापहरो भव ॥१०४॥
अद्य मे सफलं जन्म जीवितं च सुजीवितम्। यत्तवाङ्घ्र्यब्जयुगले मन्मूर्धा भ्रमरायते ॥१०५॥
तच्छ्रुत्वाऽनन्तदेवेशः प्राह सुस्निग्धया गिरा । मामैस्त्वं ब्रूहि विप्रेन्द्र! यत्ते मनसि वर्तते ॥१०६॥
कौंडिन्य उवाच–मया भृत्यवलिप्तेन त्रोटितोऽनन्तदोरकः । तेन पापविपाकेन भूतिर्मे प्रलयं गता ॥१०७।
स्वजनैः कलहो गेहे न कश्चिन्मां प्रभाषते । निर्वेदाद्गमितेऽरण्ये तव दर्शनकांक्षया ॥१०८॥
कृपया देवदेवेश ! त्वयात्मा सम्प्रदर्शितः । तस्य पापस्य मे शान्ति कारुण्याद्वक्तुमर्हसि ॥१०९॥

दर्शन गरी कौडिन्य ऋषि स्तुति गर्नलागे– ॥ १०३ ॥ हे पुण्डरीकाक्ष ! पापात्मा, पापी, पापकर्मी एवं पापसम्भवी छु । मेरो रक्षा गर र सम्पूर्ण पाप हर ॥१०४॥ हे जगदीश्वर ? आज मेरो जीवन र जन्म सफल छ; आज मेरो भ्रमरसमान शिर हजूरका पादपद्मको स्पर्श गरि-रहेछ ॥१०५॥ तब ती कौडिन्य ऋषिका मधुर वचन सुनी अनन्त देवले मधुर वाणीले भने–हे कौडिन्य ऋषे ! तिमी भय नमान; तिम्रा मनको अभिलाषा के छ भन ॥१०६॥ तब कौडिन्य भन्दछन्–मैले सम्पत्तिमा उन्मत्त भई अनन्तको डोरा छिनालिदिएँ । त्यस पाप कर्मको फलले मेरो सम्पूर्ण सम्पत्ति नष्ट भयो ॥१०७॥ मेरा घरमा पनि बन्धुवर्गसँग सधैं झगडा हुन्छ । मसँग कोही पुरुष बोल्दा पनि बोल्दैन । यसै कारण महादुःखी भै हजूरको दर्शनका निम्ति म वनमा आएँ ॥१०८॥ हे अनन्त ! हजूरले कृपापूर्वक मलाई दर्शन दिनुभयो । मैले जो

श्रीकृष्ण उवाच–तच्छ्रुत्वाऽनन्तदेवेश उवाच द्विजसत्तमम्। भक्त्या सन्तोषितो देवः किं न दद्याद्युधिष्ठर॥
अनन्त उवाच–स्वगृहे गच्छ कौण्डिन्य! मा विलम्बं कुरु द्विज! चरानन्तव्रतं भुक्त्वा नववर्षाणि पञ्च च॥
सर्वपापविशुद्धात्मा प्राप्स्यसे सिद्धिमुत्तमाम्। पुत्रपौत्रान् समुत्पाद्य भुक्त्वा भोगान् यथेप्सितान्॥
अन्ते मत्स्मरणं प्राप्य मामुपेष्यस्यसंशयम्। अन्यं च ते वरं दद्मि सर्वलोकोपकारकम्॥११३॥
इदमाख्यानकवरं शीलाऽनन्तव्रतादिकम्। करिष्यति नरो यस्तु कुर्वन् व्रतमिदं शुभम्॥११४॥
सोचिरात्पापनिर्मुक्तः प्राप्नोति परमां गतिम्। गच्छ विप्र गृहं शीघ्रं यथा येनागतो ह्यसि॥११५॥

पाप गर्ने त्यसको नाश जसरी हुन्छ दयापूर्वक आज्ञा हवस् ॥ १०९ ॥ श्रीकृष्णजी आज्ञा गर्नुहुन्छ–हे युधिष्ठिर ! कौडिन्यका यस्ता वचन सुनी अनन्तदेव आज्ञा गर्दछन्–तिम्रो भक्तिले म प्रसन्न छु, तिमीलाई सम्पूर्ण पदार्थ प्राप्त हुनेछन् ॥ ११० ॥ अनन्त आज्ञा गर्दछन्—हे कौडिन्य ! तिमी आफ्नो घर जाऊ र चौध वर्षसम्म भक्तिपूर्वक अनन्त-व्रत गर ॥१११॥ तिमी सबै पापदेखि शुद्ध आत्मा भै उत्तम सिद्धिमा प्राप्त हुनेछौ । पुत्र-पौत्र सम्पूर्ण प्राप्त भै इच्छा गरेको प्राप्त होला ॥ ११२ ॥ अन्त्यावस्थामा पनि मेरो भक्ति हाला र मरण भएपछि मेरो पदमा प्राप्त होला । फेरि म अर्को वरदान दिन्छु सो समस्त लोकको उपकारका लागि दिन्छु ॥ ११३ ॥ जो पुरुष यो शीलाकृत अनन्त व्रत कथा सुन्ला शीलाका समान अनन्त व्रत गर्ला त्यो व्रत गरी ॥ ११४ ॥ चाँडै नै सबै पापबाट छुटी परमगतिमा प्राप्त होला । अनन्तजी

कौडिन्य उवाच–स्वामिन्! पृच्छामि ते ब्रूहि किञ्चित्कौतूहलं मया। अरण्ये भ्रमता दृष्टं तद्वदस्व जगद्गुरो ॥
यश्चूतवृक्षः कस्तत्र का गौः को वृषभस्तथा। कमलोत्पलकह्लारैः शोभितं सुमनोहरम्॥११७॥
मया दृष्टं महारण्ये किं तत् पुष्करिणीद्वयम्। कः खरः कुञ्जरः कोऽसौ कोऽसौ वृद्धो द्विजोत्तमः॥११८॥
अनन्त उवाच-स चूतवृक्षो विप्रोऽसौ विद्यावेदविशारदः। विद्या न दत्ता शिष्येभ्यस्तेनासौ तरुतां गतः ॥
या गौर्वसुन्धरा दृष्टा पूर्वं सा बीजहारिणी। वृषो धर्मस्त्वया दृष्टः शाद्वले यः समास्थितः॥१२०॥
धर्माधर्मव्यवस्थानं तच्च पुष्करिणीद्वयम्। ब्राह्मण्यौ केचिदप्यास्तां भगिन्यौ ते परस्परम्॥१२१॥

भन्दछन्–तिमी जुन मार्गबाट यहाँ आयौ त्यै बाटोबाट आफ्नो घर जाऊ ॥११५॥ अनि कौडिन्य ऋषि भन्दछन्–हे भगवन्! मैले वनमा घुम्दा जो आश्चर्य देखेको छु, म तपाईसँग सोद्धछु, कृपा गरी उत्तर दिइवक्सनुहोस् ॥ ११६ ॥ जो आम्रवृक्ष थियो त्यो को थियो ? गाई र बयल को हुन् ? कमल इत्यादिले शोभायमान भएका पुष्करिणी को हुन् ? त्यो गधा को हो ? वृद्ध ब्राह्मण को थिए ? यो सबै आज्ञाहोस् ॥११७॥११८॥ अनन्तजी आज्ञा गर्दछन्–हे कौडिन्य ऋषे! त्यो आम्रवृक्ष पहिलेका विद्वान् ब्राह्मण हुन्। उनले विद्यार्थीलाई विद्या दान दिएनन् त्यसै कारणले वृक्ष भए ॥११९॥ तिमीले जो गाई देखेथ्यौ ती पृथ्वी हुन्; तिनले अघि बीज चोरेकी थिइन्। जो बयल देख्यौ ती धर्मराज धर्माधर्मको व्यवस्था नगर्दा बयल भएका हुन् ॥१२०॥ ती पुष्करिणी भएका पूर्वजन्मका ब्राह्मणका छोरी दुइटी दिदी-बहिनी

धर्माधर्मादि यत्किञ्चित् ते निवेदयतो मिथः । विप्राय न क्वचिद्दत्तमतिथौ दुर्बलेऽपि वा ॥१२२॥
भिक्षा दत्ता न चार्थिभ्यस्तेन पापेन कर्मणा । वीचिकल्लोलमालाभिर्गच्छतस्ते परस्परम् ॥१२३॥
खरः क्रोधस्तथा दृष्टः कुंजरो मद उच्यते । ब्राह्मणोऽमावनन्तोऽहं गुहा संसारगह्वरम् ॥१२४॥
इत्युक्त्वा देवदेवेशस्तदैवान्तरधीयत । स्वप्नप्रायं तु तद् दृष्ट्वा ततः स्वगृहमागतः ॥१२५॥
कृत्वाऽनन्तव्रतं सम्यक् नव वर्षाणि पञ्च च । भुक्त्वा सर्वमनन्तेन यथोक्तं पाण्डुनन्दन ॥१२६॥
अन्ते च मरणं प्राप्य गतोऽनन्तपुरे द्विजः । तथा त्वमपि राजर्षे कथां शृण्वन् व्रतं कुरु ॥१२७॥

हुन् ॥१२१॥ ती दुइटी दिदी-बहिनी धर्माधर्म जो गर्दथे ती परस्पर गर्दथे । तिनले दुर्बल र ब्राह्मणलाई केही पनि भोजनादि पदार्थ दिएनन् ॥१२२॥ याचकहरूलाई भिक्षा पनि दिएनन् त्यसैले परस्पर जल र लहरी एकत्र हुन्छन् ॥१२३॥ तिमीले जो गधा देख्यौ त्यो क्रोध हो र जो त्यो हात्ती देख्यौ त्यो मद हो; ती वृद्ध ब्राह्मण मै अनन्त हुँ; यो गुहा भयदाता हुँदा भए । यो चरित्र स्वप्नसमान देखी कौडिन्य ऋषि घर फर्के ॥१२४॥१२५॥ कृष्णजी आज्ञा गर्नुहुन्छ—हे युधिष्ठिर ! ती कौडिन्य ऋषिले चौध वर्षसम्म अनन्तको व्रत गरे अनन्तघाट आज्ञा भए अनुसार भोग गरी ॥१२६॥ मरण समयमा अनन्त भगवानको स्मरण गरी अनन्त पुरमा जाँदा भए । श्रीकृष्ण आज्ञा गर्दछन्—हे युधिष्ठिर ! त्यसै प्रकारले हजुर पनि त्यो कथा स्मरण गरिबक्सनुहोस् ॥१२७॥ जस्तै चौध वर्षसम्ममा ती कौडिन्य अनन्तघाट आज्ञा भए बमोजिम

प्राप्स्यते चिन्तितं सर्वमनन्तस्य वचो यथा । यद्वै चतुर्दशे वर्षे फलं प्राप्तं द्विजन्मना ॥१२८॥
वर्षैकेन तदाप्नोति कृत्वा साख्यानकं व्रतम् । एतत्ते कथितं भूप ! व्रतानामुत्तमं व्रतम् ॥१२९॥
यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः । येऽपि शृण्वन्ति सततं पठ्यमानं पठन्ति ये ॥
तेऽपि पापविनिर्मुक्ताः प्राप्स्यन्ति च हरेः पदम् ॥१३०॥

संसारसागरगुहासु सुखं विहर्तुं वांछन्ति ये कुरुकुलोद्भव ! शुद्धसत्त्वाः ॥
सम्पूज्य च त्रिभुवनेशमनन्तदेवं बध्नन्ति दक्षिणकरे वरदोरकं ते ॥१३१॥

प्राप्त भोग भोगेर परमपदमा प्राप्त भए, उस्तै हजुरलाई पनि सम्पूर्ण मनोरथ प्राप्त होला ॥ १२८ ॥ जो पुरुष फलको इच्छा गर्दछ सो कथा सहित व्रत गरोस्, एक वर्षमा ती फल प्राप्त हुनेछन् । कृष्णजी आज्ञा गर्नुहुन्छ–हे युधिष्ठिर ! यो व्रतहरूमा उत्तम व्रत मैले हजुरलाई सुनाएँ ॥१२९॥ यो व्रत गर्नाले मनुष्य समस्त पापदेखि मुक्त हुन्छ यसमा संशय छैन । जो कोही यो कथा सुन्ला सुनाउला त्यो मनुष्य समस्त पापदेखि छुटी अनन्तलोकमा प्राप्त होला ॥ १३० ॥ हे कुरुकुलोद्भव ! जो कोई शुद्ध आत्मा भएका मनुष्य यो संसारमा सुखपूर्वक विहार गर्ने इच्छा गर्दछन् ती त्रिभुवनेश अनन्तको पूजा गरी दाहिने हातमा अनन्तको डोरो बाँध्नेछन् ॥१३१॥

इति अनन्त व्रतकथा ।

शरत्कालीय-नवरात्र-पूजाविधिः

तत्रादौ प्रतिपदि कृत्यम् ॥ तत्र निर्णयः—

अमायुक्ता न कर्तव्या प्रतिपत् पूजने मम । मुहूर्तमात्रं कर्तव्या द्वितीयादि गुणान्विता ॥
देशभङ्गो भवेत्तत्र दुर्भिक्षं चोपजायते । नन्दायां दर्शयुक्तायां यत्र स्यात् मम पूजनम् ॥ –भार्गवाचनचन्द्रिका
त्वाष्ट्रवैधृतियुक्ता चेत् प्रतिपत् चण्डिकार्चने । तयोरन्ते विधातव्यं कलशारोपणं गृहे ॥

चित्रनक्षत्रे वैधृतियोगं समायुक्तं प्रतिपत्तिथिं च वर्जयित्वा शुद्धप्रतिपत्तिथौ अथवा द्वितीयातिथौ घटस्थापनं कुर्यात् यदि तु प्रतिपल्लुप्ता तदाऽमायामपि कार्यम् ॥ रात्रौ स्थापनं कुर्यान्न च कुम्भाभिषेचनम् ॥–मत्स्यपुराण ॥ रात्रौ घटस्थापनं विसर्जनं च न कुर्यात् ॥ प्रयोगः–प्रातः समये स्नानसन्ध्यादि नित्यकृत्यकर्म कृत्वा कदल्यादिस्तम्भैर्वितानतोरणवस्त्रवेष्टितमण्डिते दुर्गागृहे चतुरस्रचतुर्हस्तवेदिकोपरि सर्वतोभद्रादिमण्डिते शुद्धगूढभूमिचन्दनाक्षतपुष्पधूपदीपनैवेद्य-कुश-तिल-जल-सम्पूर्णसामग्रीं सम्पाद्य कर्मारम्भे दीपपूजनमित्याचारः ॥ आचम्य कर्मपात्रं कृत्वा कुशादीन्यादाय—ॐ तत्सत् ३ ॐ विष्णुः ३ मम इत्यादि देशकालौ सङ्कीर्त्य

अद्येहेत्यादि अमुकगोत्रस्य सदारापत्यस्यामुकशर्मणो मम अद्य प्रभृति नवमीपर्यन्तमुपवासादि-नियमैरिष्टदेवताप्रीतिद्वारा त्रिवर्गसम्पत्तिसिद्धये, नवरात्रव्रतमहं करिष्ये तदङ्गतया कारिष्यमाण-नवदिनपर्यन्तमहर्निशं दीपप्रज्वालनादि नवरात्रव्रतकर्मणि निर्विघ्नतासिध्यर्थम् श्रीगणेश्वरस्य यथा-मिलितोपचारैः पूजनमहं करिष्ये ।

एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् । पाशांकुशधरं देवं ध्यायेत् सिद्धिविनायकम् ॥

इत्यादिना ध्यात्वा आवाहनासनपाद्यार्घ्याचमन-स्नान-पञ्चामृतस्नानाचमन-वस्त्र-यज्ञोपवीत-भूषण-गन्ध-पुष्पाक्षत-धूप-दीप-नैवेद्यान्ते गणेशं सम्पूज्य स्वशक्त्यां मातृकांश्च सम्पूज्य पुण्याहवाचनं कुर्यात् ॥ सम्भवे ग्रहं च संस्थाप्य — ॐ यवोसियवयास्मद्वेषो यवयारातीदिवेत्वान्तरिक्षायत्वापृथिव्यैत्वाशुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि। मन्त्रेण यवं प्रक्षाल्य शुद्धमृत्तिकायाः मण्डपं कृत्वा सङ्कल्पं कुर्यात्—

ॐ अद्येह देव्यास्तुष्ट्यर्थं यवरोपणमहं करिष्ये ॥

ॐ यव त्वं यवरूपोऽसि यज्ञार्थे निर्मितोऽसि हि । देवीनां तृप्तिकारी च तस्मात्त्वं वरदो भव ॥

जयन्ती मङ्गलाकाली भद्रकाली कपालिनी । दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते॥

शुद्धोदकेन यत्रोपरि सेचनम् ॥ घटस्थापन सङ्कल्पः—ॐ अद्येह ममेह जन्मनि दुर्गाप्रीतिद्वारा सर्वापच्छान्तिपूर्वकदीर्घायुर्विपुल-धन-पुत्र-पौत्राद्यनवच्छिन्न-सन्ततिवृद्धि-स्थिरलक्ष्मी-कीर्तिलाभ-शत्रुपराजय-सदभीष्टसिद्ध्यर्थं शारदनवरात्रप्रतिपदि विहितकलशस्थापनपूर्वकं दुर्गाकुमारीपूजनमहं करिष्ये ॥ कलशस्थापनविधिना घटं संस्थाप्य तत्र घटोपरि प्रतिमां संस्थाप्य अथवा तदभावे दध्यक्षता संस्थाप्य श्रीदुर्गामावाहयेत् ॥ ध्यानम्—

जटाजूटसमायुक्तां मूर्द्धेन्दुकृतशेखराम् । लोचनत्रयसम्पन्नां पद्मेन्दुसदृशाननाम् ॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् । नवयौवनसम्पन्नां महिषासुरमर्दिनीम् ॥
त्रिशूलं दक्षिणे दद्यात् खड्गं चक्रं च वामतः । तीक्ष्णं बाणं तथा शक्तिं वामतो सन्निवेशयेत् ॥
खेटकं पूर्णचापं च पाशमंकुशमूर्द्धजम् । घण्टां च परशुं चापि वामतः सन्निवेशयेत् ॥
अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत् । शिरश्छेदोद्भवं यद्वद्दानवं खड्गपाणिनम् ॥
हृदि शूलेन निर्भिन्नं तिर्यग्गन्धविभूषितम् । रक्तरक्ताकुलाङ्गं च रक्तविस्फारितेक्षणम् ॥
वेष्टितं नागपाशेन भ्रुत्कुटीभीषणाननाम् । वमन् रुधिरवक्त्रं च देव्याः सिंहं प्रदर्शयेत् ॥

देव्यास्तु दक्षिणं पादं समसिंहोपरिस्थितम्। किञ्चिदूर्ध्वं तथा वाममङ्गुष्ठं महिषोपरि॥
स्तूयमानं च तद्रूपममरैः सन्निवेशयेत्॥

आवाहनम्—एहि दुर्गे महाभागे! रक्षार्थं मम सर्वदा। आवाहयाम्यहं देवि! सर्वकामार्थसिद्धये॥
अस्यां मूर्तौ समागच्छ, इह तिष्ठ, इह सन्निहिता भव, इह स्थिरा भव, सुप्रसन्ना भव, वरदा भव॥

एतन्तेदेवसवितर्यज्ञम्प्राहुर्बृहस्पतयेब्रह्मणे॥ तेनयज्ञमवतेनयज्ञपतिन्तेनमामव॥

प्रतिष्ठाप्य॥ ॐ दुर्गे दुर्गे रक्षणि! स्वाहा॥ ॐ जयन्ती मङ्गला काली० इति मन्त्रेण च दुर्गादेव्यै पाद्यार्घ्याचमनीय-पञ्चामृतस्नान-शुद्धोदकस्नान-वस्त्र-यज्ञोपवीत-भूषण-चन्दन-सिन्दूराञ्जन-आदर्शादि सौभाग्यद्रव्याक्षत-पुष्पमाल्य-बिल्वपत्र-धूप-दीप-नैवेद्य-ताम्बूल-दक्षिणादि षोडशोपचारैः पञ्चोपचारैः यथासम्भवैर्वा दुर्गां सम्पूज्य दुर्गां प्रणम्य प्रार्थयेत्—

आगच्छ देवदेवेशि! दैत्यदर्पनिषूदनि! पूजां गृहाण सुमुखि! नमस्ते शङ्करप्रिये!॥
सर्वतीर्थमयं वारि सर्वदेवसमन्वितम्। इमं घटं समागच्छ तिष्ठ देवगणैः सह॥
दुर्गे देवि! समागच्छ सान्निध्यं कुरु वै ध्रुवम्। बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह॥

महिषघ्नि महामाये ! चामुण्डे ! मुण्डमालिनि ! द्रव्यमारोग्यविजयं देहि देवि ! नमः सदा ॥
सर्वमङ्गलमाङ्गल्ये शिवे ! सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि ! नारायणि नमोऽस्तु ते ॥
रूपं देहि यशो देहि भाग्यं भवति देहि मे । पुत्रं देहि धनं देहि सर्वान् कामान् प्रदेहि मे ॥

एवं प्रार्थनानन्तरं सुगन्धिद्रव्यं देयम् ॥ कन्यापूजा—गणेशं बटुकं दुर्गां प्रणम्य सङ्कल्पः—

ॐ अद्येह मम देवीप्रसादाद् विविधमनोऽभीष्टकामनावाप्ति-राज्यकरणोत्तरकालिकदेवीलोकगमन-कामनया कुमारीं बटुकं च पूजनपूर्वकं भोजयिष्यामि ।

मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् । नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥—इत्यावाह्य पूजा मन्त्रश्च—जगत्पूज्ये ! जगद्धात्रि ! सर्वशक्तिस्वरूपिणि ! पूजां गृहाण कौमारि ! जगन्मातर्नमोऽस्तु ते ॥ पादप्रक्षालनादिभिः पूजयेत् । एवं नानावस्त्रपक्वान्नालङ्कारैः स्वशक्त्या देवीपूजानन्तरं नवमीपर्यन्तं प्रत्यहं वा कुर्यात् ।

एकैकां पूजयेत् कन्यामेकवृद्ध्यास्तथैव च । द्विगुणामपि प्रत्येकं नवकं च विशेषतः ॥
द्विवर्षकन्यामारभ्य दशवर्षावधिक्रमात् । पूजयेत् सर्वकार्येषु यथाविध्युक्तमार्गतः ॥
अत ऊर्ध्वं तु या कन्या सर्वकार्येषु वर्जिता । आयुष्यं बलवृद्ध्यर्थं कुमारीं पूजयेन्नरः ॥

आयुःकामस्त्रिमूर्तिं तु त्रिवर्गस्य फलप्रदाम्। अल्पमृत्युव्याधिपीडादुःखदारिद्र्यनाशिनीम्॥
आरोग्यसुखकामी च जयकामी तथैव च। यशःकामी नरो नित्यं रोहिणीं प्रतिपूजयेत्॥
विद्यार्थी चाभयार्थी च राज्यार्थी च विशेषतः। वैरीणां च विनाशार्थी कालिकां पूजयेन्नरः॥
ऐश्वर्यसुखकामी च पुत्रकामी च यो नरः। संग्रामे जयकामी च चण्डिकां प्रतिपूजयेत्॥
दुःखदारिद्र्यनाशाय नृपसंमोहनाय च। महापापविनाशार्थं शाम्भवीं च प्रपूजयेत्॥
सर्वलोकस्य शत्रूणां उपसाधनकर्मणि। दुर्गां तु दुःखनाशाय पूजयेद्भक्तितो बुधः॥
सौभाग्यधनधान्यादि वाञ्छितार्थफलाप्तये। सुभद्रां पूजयेद् मर्त्यो दासीदासादिवृद्धये॥

त्रिमूर्तिपूजा—त्रिपुरां त्रिपुराधारां त्रिवर्गज्ञानरूपिणीम्। कामदां करुणोदारां कालीं च पूजयाम्यहम्॥
कल्याणीपूजा-कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम्। कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहम्॥
रोहिणीपूजा—अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम्। अनन्तशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम्॥
कालिका०—कामवारिशुभाकान्तां कालचक्रस्वरूपिणीम्। कामदां करुणोदारां कालीं च पूजयाम्यहम्॥
चण्डिका०—चण्डवीरां चण्डमायां चण्डमुण्डप्रभञ्जनीम्। पूजयामि सदा देवीं चण्डिकां चण्डविक्रमाम्॥
शाम्भवी०—सदानन्दकरीं शान्तां सर्वदेवपरिष्कृताम्। सर्वभूतात्मिकां लक्ष्मीं शाम्भवीं पूजयाम्यहम्॥

दुर्गा०—दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम्। पूजयामि सदा भक्त्या दुर्गे दुर्गार्तिनाशिनीम्॥
सुभद्रा०—सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम्। सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम्॥

भक्तितः कुमारीणां यत्नतः पूजा कार्या—

कञ्चुकैश्चैव वस्त्रैश्च गन्धपुष्पाक्षतादिभिः। नानाविधैर्भक्ष्यभोज्यैर्भोजयेत् पायसादिभिः॥

सप्तशतीपाठविधिः—सकलपूजानन्तरं सप्तशत्यादि पाठजपादिकं कुर्यात्॥ ब्राह्मणद्वारा कुर्यात् श्रूयाद्वा॥ तत्र सप्तशतीपाठस्यावृत्तिसंख्याभेदेन प्रयोगसारतन्त्रोक्तफलविशेषमाह—

चण्डिपाठफलं देवि! शृणुष्व मदतो मम। पाठादूबलिप्रदानाच्च सिद्धिमाप्नोति मानवः॥
उपसर्गोपशान्त्यर्थं त्रिरावृत्तिं पठेन्नरः। ग्रहोपशान्तौ कर्तव्यं पञ्चावृत्तिं वरानने!॥
महाभये समुत्पन्ने सप्तावृत्तिं समुन्नयेत्। नवावृत्त्या भवेच्छान्तिर्वाजपेयफलं लभेत्॥
राजवश्याय भूत्यै वा रुद्रावृत्तिमुदीरयेत्। अर्कावृत्त्या काम्यसिद्धिर्वैरहानिस्त्रयोदशे॥
मन्वावृत्यारिपुर्वश्यस्तथा स्त्रीवश्यतामियात्। सौख्यं पञ्चदशावृत्त्या श्रियमाप्नोति च प्रिये॥
महारणविमोक्षाय विंशावृत्तिं पठेत् सुधीः। पञ्चविंशावर्तनात्तु भवेद् बन्धुविमोक्षणात्॥

संकटे समनुप्राप्ते दुश्चिकित्स्यामये तथा । जातिभ्रंशे कुलच्छेदे चायुषोनाश आगते ॥
वैरवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये । तथैव विविधोत्पाते तथा चैवातिपातके ॥
कुर्याद्यस्माच्छतावृत्तिस्ततः सम्पद्यते शुभम् । श्रेयोवृद्धिः शतावृत्त्या राज्यवृद्धिस्तथापरः ॥
मनसा चिन्तितं देवि ! सिद्धेदष्टोत्तरावृता । शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते ! ॥
सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिता । भुक्त्वा मनोरथान् कामान्नरो मोक्षमवाप्नुयात् ॥
आदावन्ते च कुर्वीत प्रणवं सहितां पठेत् । सर्वत्र पाठे विज्ञेयो ह्यन्यथा विफलं भवेत् ॥
न कर्मासक्तचित्तेन क्रुद्धेन स्तोत्रवाचनम् । अधो वै स्थापयित्वा तु पुस्तकं तु जपेत् सुधीः ॥
हस्तसंस्थापनादेव यस्मादल्पफलं भवेत् । ब्राह्मणं वाचकं विद्वान्नान्यवर्णजमादरात् ॥
श्रुत्वान्यवर्णजाद्राजन् ! वाचकान्नरकं व्रजेत् ॥

सप्तशतीपाठवेदपाठानेकपुराणान्तर्गतस्तोत्रपाठ-गायत्रीजप-नवार्णवमन्त्रजपादीन् यथाशक्ति कुर्यात्। सङ्कल्पः—

अद्येह मम भूत-भविष्य-वर्तमान-जन्मजन्मान्तराणां दुष्कृतनिवृत्तिदुष्कृतोत्थसमस्तपापक्षयशत्रु-दस्युराज-शस्त्रानलतोयौघहेतुक-मयाभाव-महामारीसमुद्भवाशेषोपसर्गापगम-त्रिविधोत्पातोपशम-सर्वापच्छान्तिपूर्वक-रक्षोभूतपिशाचग्रहपरकृत्याबालग्रहादिसकलबाधाशमयिनी श्रीदुर्गासान्निध्य-

द्वारा सर्वगुणोत्पत्ति-दीर्घायुर्विपुल-धनधान्य-पुत्रपौत्राद्यनवच्छिन्नसन्ततिवृद्धि-सकलकुलानन्द-स्थिरलक्ष्मी-कीर्तिलाभ-सुखप्राप्ति सदभीष्टसिद्धिमूलक-महाकाली-महालक्ष्मी-महासरस्वतीप्रीतये मार्कण्डेयपुराणान्तर्गत सावर्णिः सूर्यतनय इत्यारभ्य सावर्णिर्भवितामनुः पर्यन्तं पाठं कर्तुमद्यारभ्य नवमीपर्यन्तं, ब्राह्मणानां पूजनं वरणं च करिष्ये ॥ पाठान्ते यथाशक्ति बलिदानं छाग-कूष्माण्डफलैर्वा वक्ष्यमाणविधिना कार्यम् ॥

द्वितीयदिनकृत्यम्—द्वितीयायां श्रीपरमेश्वर्यै पट्टकेशरज्जुं कङ्कतिकां दद्यात् । तृतीयायां—दर्पणं सिन्दूरं कज्जलम् । चतुर्थ्यां—मधुशर्करा दधिकांश्यपात्रान्नं कांश्यस्थालिकास्थमधुपर्कं कज्जलम् । पञ्चम्यामुद्वर्तनं सौवर्णं रौप्यं वा भूषणमथवा तत्पुष्पं दद्यात् । प्रतिसन्ध्यं प्रतिपदादि तिथिषु पूजनं यथाशक्त्या । द्वितीयायां मध्याह्नत ऊर्ध्वं सन्ध्याकालादर्वाक् बालचन्द्रदर्शनं कुर्यात् । शंखार्घं श्वेतचन्दनदध्यक्षततोयं निधाय जानुनावनिं स्पृष्ट्वा दक्षिणहस्तेन चन्द्रार्घ्यदानम्—

अत्रिनेत्रसमुद्भूत क्षीरोदार्णवसम्भव । गृहाणार्घ्यं शशांकेश ! रोहिण्या सहित प्रभो ! ॥

प्रणाममन्त्रः—नमः सुधांशवे तुभ्यं लक्ष्मीभ्रातर्नमो नमः। निष्कलङ्किन् कलाधारिन् गङ्गाधरशिरोमणे ॥
शम्भोर्जटाजूटवासिन् बालचन्द्र नमोऽस्तु ते ॥

षष्ठ्यां बिल्वनिमन्त्रणविधिः—शुक्लषष्ठ्यां ज्येष्ठायुतायां सूर्यास्तवेलायां बिल्वतरुसन्निधौ गत्वा उपवासादि कृत-नित्यक्रियः पूर्वमुखं उत्तरमुखं वा उपविश्याऽऽचम्य सन्ध्याकालसमये दीपं प्रज्वाल्य सङ्कल्पं कुर्यात्—ॐ अद्येह० श्रीदुर्गाप्रीतिकामः श्रीवृक्षपूजनपूर्वकं बिल्वनिमन्त्रणमहं करिष्ये ॥ ॐ भगवति दुर्गे इहागच्छ इह तिष्ठेत्यावाह्य पाद्यादि नैवेद्यान्तोपचारैः सम्पूजयेत्—

रावणस्य वधार्थाय रामस्यानुग्रहाय च। अकाले लवणाम्भोधौ त्वया देव्याश्रितः पुरा ॥
अहमप्याश्रितः षष्ठ्यां सायाह्ने बोधयाम्यतः। पूजयामीह दुर्गे त्वां सर्वशत्रुविनाशिनीम् ॥
देवदेवांशसम्भूत श्रीवृक्ष चण्डिकाप्रिय! आमन्त्रयामि पूजार्थं शाखामेकं प्रयच्छ मे ॥—इत्यामंत्र्य यथोक्तविधिना बिल्ववृक्षाधिवासं कृत्वा नृत्यगीतवाद्योत्सवै रात्रौ जागरणं कृत्वा—ॐ बिल्व! इहागच्छ इह तिष्ठ इति आवाह्य 'बिल्वाय नमः' पाद्यादिसिन्दूर-गन्ध-पुष्पाक्षत-धूपदीप-ताम्बूल-नैवेद्यान्तं दद्यात्।

बिल्ववृक्षं स्पृष्ट्वा—श्रीशैलशिखरेजात श्रीफल श्रीनिकेतन। नेतव्योऽसि समागच्छ पूज्यो दुर्गा स्वरूपतः ॥

सप्तमी दिनकृत्यम्—सप्तम्यां प्रातरारभ्य पत्रिकापूजनान्तं पुस्तकादौ सरस्वतीं पूजयेत् ।

मूलऋक्षे सुरार्चा श पूजनीया सरस्वती ॥ सप्तम्यां मूलयुक्तायां वा केवलायां पत्रिका प्रवेशः । तद्दिने प्रातःसमये नित्यकर्म कृत्वा पुनर्बिल्वसमीपं गत्वा प्रणम्य—

बिल्ववृक्ष! महाभाग! सदा त्वं शङ्करप्रिय । गृहीत्वा तव शाखां च पूज्या दुर्गेति च स्मृतिः ॥
उत्तिष्ठ पत्रिके देवि! सर्वकल्याणहेतवे । पूजां गृहाण सकलामस्माकं वरदा भव ॥
मेरुमन्दरकैलाशहिमवच्छिखरे गिरौ । जाता श्रीफलवृक्षे त्वमम्बिकाया सदाप्रिये ॥

बिल्ववृक्षस्य दक्षिणस्यां दिशि श्रीफलयुगलसहितां शाखां गृहीत्वा गन्धादिभिः सम्पूज्य—ॐ छिन्धि फट् अस्त्राय नमः । ॐ हुँ फट् स्वाहा । मन्त्रेण संछिन्द्य तच्छाखात्रोटनं कृत्वा इक्षादवतीर्य—कदलीस्तम्भ-दाडिमधान्यवृक्षहरिद्रावृक्षमानककर्चूरबिल्वपत्राशोकजयन्तीद्रोणपुष्पान्यपुष्पफलं च यद्यद्ध्यं संपूर्णमाहृत्य प्रार्थयेत्—शाखाच्छेदेन यद्दुःखं यत्कृतं हि मया प्रभो । क्षम्यतां मम दृक्षेश बिल्ववृक्ष नमोऽस्तु ते ॥
बिल्ववृक्ष महाभाग! सर्वदा शङ्करप्रिय । गृहीत्वा तव शाखां च देवीपूजां करोम्यहम् ॥
ॐ ह्रौं ह्रुँ क्रीं चामुण्डे चलचल शीघ्रं त्वमम्बिके प्रविश ॥

चण्डि त्वं दुर्गरूपासि सुरतेजा महाबले । प्रविश्य तिष्ठ यज्ञेऽस्मिन् यावत् पूजां करोम्यहम् ॥
प्रविश्य स्थापयेत् ॥ ॐ स्थां स्थीं इति स्थिरो भव ॥
आरोपितासि दुर्गे त्वं मृण्मयं श्रीफलं तु वा । स्थिरीभूता च त्वं देवि! गृहाण कामदा भव ॥
स्थिरीकृत्य पत्रिकामुत्थाप्य दोलायामारोप्य दोलां स्कन्धे निधाय मौनी सन् गृहसमीपे आनीय नानावादित्रादि मङ्गलपुरस्सरं पत्रिकायां यथामिलितोपचारैः सम्पूज्य ततो देवीगृहाभ्यन्तरे सायंकाले पत्रिकां प्रवेशयेत् ॥ सप्तम्यां सन्ध्योत्तरकृत्यम् ततो भूतादीनां कृच्छान्नबलिं दद्यात् ॥ ॐ भूत इहागच्छेह तिष्ठेत्यावाह्य संस्थाप्य भूतादिभ्यो नमः पाद्यादिनैवेद्यान्तैः संपूज्य प्रार्थयेत्—
भूताः प्रेताः पिशाचाश्च ये वसन्त्यत्र भूतले । ते गृह्णन्तु मया दत्तं बलिमेतत्प्रसादितम् ॥
पूजिता बलिपुष्पाद्यैस्तर्पिता बलिभिस्तथा । देशादस्माद्विनिःसृत्य पूजां गृह्णन्तु मत्कृताम् ॥
एष माषबलिर्भूतादिभ्यो नमः सर्षपं च विकीर्य बल्युपरि दीपं प्रज्वाल्य गृहाद्बहिः स्थापयेत् ॥ ततः सप्तम्यां पुस्तकादौ प्रभाते वा पत्रिकापूजनानन्तरं सरस्वतीं स्थापयेत्—
वेदशास्त्रपुराणानि स्मृतिव्याकरणानि च । ज्योतिषं मन्त्रविद्यां च सर्वविद्यामनेकधा ।

विततां पुस्तके मातर्निश्चयं कुरु मे गृहे। सञ्जीवनकुलेजातं पुस्तकाय नमो नमः॥
मन्त्रादिना पूजयेत्॥ ॐ अद्येहेत्यादि सर्वापच्छान्ति सर्वकल्याणोत्पत्ति नानाविधसौख्यप्राप्त्यर्थं देविगृहेऽहर्निशं दीपप्रज्वालनमहं करिष्ये॥ ततः अद्येहेत्यादि आश्विनशुक्लसप्तम्यां सर्वापच्छान्तिसर्वविधसौख्यप्राप्तिपूर्वक शरत्कालीयनवदुर्गा-शाकम्भरीस्थापनमहं करिष्ये॥
मृण्मयीं दुर्गाप्रतिमां सफलां बिल्वशाखां कदल्यादि नवपत्रिकां च संस्थाप्य पञ्चामृतेन संस्नाप्य—
एतन्तेसवितर्यज्ञंप्राहुर्बृहस्पतयेब्रह्मणे। तेनयज्ञपतिन्तेनमामव॥—प्रतिष्ठाप्य पूजयेत्॥
पत्रिका नामानि—कदली दाडिमं धान्यं हरिद्रा मानकं कचम्। बिल्वशोकौ जयन्ती च विज्ञेया नवपत्रिका॥
प्रत्येकं नवपत्रिकापूजनं यथाशक्ति कृत्वा स्नानीयं दद्यात्—
आत्रेयी नर्मदा गङ्गा यमुना च सरस्वती। सरयू गण्डकी पुण्या श्वेतगङ्गा च कौशिकी॥
भोगावती च पाताले स्वर्गे मन्दाकिनी तथा। सर्वा सुमनसो भूत्वा शृङ्गारैः स्नपयन्तु ते॥
कदल्यै नमः। कदल्यां ब्रह्माणीहागच्छेह तिष्ठेत्यावाह्य 'ब्रह्माण्यै नमः' इति पाद्यादिनैवेद्यान्तं दद्यात्॥ दाडिम्यां रक्तचण्डिकाम्—

सर्वेषामधिपो देव ईशानो नाम नामतः। शूलपाणिर्महादेवः शृङ्गारैः स्नपयन्तु ते॥
पूर्ववदिहागच्छेत्यादि संपूजयेत्॥ धान्ये लक्ष्मीम्—
पुण्यस्त्वं पुण्यशाखानां मङ्गलानां च मङ्गलम्। विष्णुना विधृतो नित्यमतः शान्तिं प्रयच्छ मे॥
मन्दाकिन्यास्तु ते वारि सर्वपापहरं शुभम्। स्वर्गस्रोतस्तु वैष्णव्यं शृङ्गारैः स्नपयन्तु ते॥
हरिद्रायां दुर्गाम्—परं पवित्रमुष्णं च वह्निज्योतिः समन्वितम्। जीवनं सर्वपापघ्नं शृङ्गारैः०॥
हरिद्रायां चामुण्डाम्—गन्धाढ्यं चन्दनं दिव्यं सुशीतलसुरप्रियम्। सर्वपापहरं चैव शृङ्गारैः०॥
कचे कालिकाम् सागराः सरितः सर्वाः सरः स्रोतोद्गमस्तथा। सर्वौषधीभिः पापघ्नाः शतशः स्नपयन्तु ते॥
सर्वाः सुमनसो भूत्वा शृंगारैः स्नपयन्तु ते॥
बिल्वे शिवाम्—हिमवद्धेमकूटाद्याश्चाभिषिञ्चन्तु पर्वताः। निर्झरोदकपूर्णेन षष्ठेन कलशेन तु॥
सर्वा सुमनसो भूत्वा शृंगारैः स्नपयन्तु ते॥
अशोके शोकहारिणीम्—लवणेक्षुसुरासर्पिर्दधिक्षीरजलैस्तथा। सर्वाः सुमनसो भूत्वा शृंगारैः०॥
जयन्त्यां कार्त्तिकीम्-दुर्गा चण्डी भीमचण्डी वाराही कार्तिकी तथा। हरिसिद्धिस्तथा काली रुद्राणी वैष्णवी तथा॥

भद्रकाली विशालाक्षी भैरवी सर्वरूपिणी। सर्वाः सुमनसो भूत्वा शृङ्गारैः स्नपयन्तु ते॥

पूर्ववत्सम्पूज्य॥ तत्रैव तक्षकादींश्च स्नापयेत् पूजयेच्च॥

तक्षकाद्याश्च ये चान्ये पातालतलवासिनः। सर्वाः सुमनसो भूत्वा शृङ्गारैः स्नपयन्तु ते॥

अनेन प्रकारेण प्रत्येकं पत्रिकां स्नापयित्वा पूजयेत्। ततो बिल्वपत्रशाखायां श्रीपरमेश्वरीमावाहयेत्—

आवाहयाम्यहं देवीं श्रीफले मृण्मये तथा। आयुरारोग्यमैश्वर्यं देहि देवि नमः सदा॥
कैलासशिखरे देवी हिमाद्रेर्हिमपर्वतात्। आगच्छ बिल्वशाखायां चण्डिके कुरु सन्निधिम्॥
स्थापितासि मया दुर्गे! पूजये त्वां प्रसीद मे। आयुरारोग्यमैश्वर्यं देहि देवि! नमोऽस्तु ते॥
महादुर्गे स्वरूपासि सुरतेजोमयार्चिते। सदानन्दकरि देवि प्रसीद मम हृदये॥
एह्येहि भगवत्यम्ब! शक्रयज्ञजयप्रदे। भक्त्या च पूजयामि त्वां दुर्गे देवि नमोऽस्तु ते॥
पल्लवैश्च फलोपेतैः पुष्पैश्च सुमनोहरैः। पल्लवे संस्थिते देवि पूजये त्वां प्रसीद मे॥
दुर्ग देवि इहागच्छ सान्निध्यं मम कल्पय। यज्ञभागान् गृहाण त्वं योगिनीकोटिभिः सह॥

सर्वत्र यवं विकीर्य—ॐ दुर्गे दुर्गे रक्ष स्वाहा दुर्गायै नमः॥ जयन्ती मङ्गला काली चेति पाद्यार्घ्याच-

मनीय-मधुपर्क-पञ्चामृत-शुद्धस्नान-वस्त्राभूषण-गन्धाक्षत-पुष्प-सिन्दूर-कज्जलादिद्रव्य-धूप-दीप-नैवेद्य-ताम्बूलादिसमस्तपत्रिकास्वरूपायै भगवत्यै दुर्गादेव्यै नमः इत्यादिना दत्वा नमस्कारः—

ऊग्रचण्डे रुद्रचण्डे चण्डोग्रे चण्डनाशिनि। चण्डिके चण्डवत्यम्ब चण्डि तुभ्यं नमो नमः॥
महिषघ्नि महामाये चामुण्डे मुण्डमालिनि। क्षेममारोग्यमैश्वर्य देहि देवि! नमोऽस्तु ते॥

बिल्वपत्रमादाय—सुधोद्भवं च श्रीवृक्षं शङ्करस्य सदाप्रियम्। पवित्रं ते प्रयच्छामि बिल्वपत्रं सुरेश्वरि॥

द्रोणपुष्पम्—ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदा प्रियम्। तत्ते दुर्गे! प्रयच्छामि सर्वकामार्थसिद्धये॥
कुंकुमेन समालिप्ते चन्दनेन विलेपिते। बिल्वपत्रकृताऽऽपीडे दुर्गेऽहं शरणं गतः॥
रूपं देहि यशो देहि भगं भगवति तथा। पुत्रान् देहि धनं देहि सर्वान् कामान् प्रदेहि मे॥

प्रत्येकं नवपत्रिकापूजा—ॐ अद्येहेत्यादि नवपत्रिकायां नवदेवीनां पूजनमहं करिष्ये।

इति सङ्कल्प्य आवाहनादि ताम्बूलान्तैः संपूज्य प्रत्येकं प्रार्थयेत्॥ कदल्यां ब्रह्माणीपूजा—

दुर्गे देव! समागच्छ सान्निध्यमिह कल्पय। रम्भारूपेण मे नित्यं शान्तिं कुरु सदा शुभे॥१॥

दाडिम्यां रक्तचण्डिका-दाडिमि त्वं पुरा युद्धे रक्तबीजस्य सम्मुखे। उग्रकार्यं कृतं यस्माद्दुर्गे देवि नमो नमः॥२॥

धान्ये लक्ष्मीम्–जगतः प्राणरक्षार्थं ब्रह्मणा निर्मितं पुरा । उमाप्रीतिकरं धान्यं तस्माद्रक्षतु सर्वदा ॥३॥
हरिद्रायां दुर्गां–हरिद्रे वरदे देवि ! उमारूपासि सुप्रभे । मम विघ्नविनाशाय पूजां चैव गृहाण भो ॥४॥
मानके चामुण्डां–अस्मिन् देवि समातिष्ठ मानवृक्षे शचीप्रिये । मम चानुग्रहार्थाय पूजां स्वीकरणाय च ॥५॥
कर्चूरके कालिकां–महिषासुरयुद्धेषु कालीभूतासि सुव्रते । मम चानुग्रहार्थाय आगतासि हरप्रिये ॥६॥
बिल्वे शिवां–महादेवप्रियकरो वासुदेवप्रियः सदा । उमाप्रीतिकरो यस्तु बिल्ववृक्ष नमोऽस्तु ते ॥७॥
अशोके शोकहारिणीं-हर प्रियकरो वृक्ष सदा त्वं शोकनाशनः । दुर्गाप्रीतिकरो यस्मात् तस्मात्त्वं रक्ष मां सदा
जयन्त्यां कार्तिकीं–निशुम्भशुम्भमथने सेन्द्रैर्देवगणैः सह । जयन्ति पूजयामि त्वामस्माकं वरदा भव ॥९॥

इति नवपत्रिकां सम्पूज्य प्रार्थयेच्च ॥ खड्ग-छुरिका-धनुर्ध्वज-पताका-शक्तिचर्मासि-दुन्दुभि-शंख-घण्टा-कट्टारक-छत्र-चामर-शस्त्रास्त्राणि श्रीदेव्यासमीपे स्थापयेत् । इति सप्तम्यां पत्रिकाप्रवेशः पूजनविधिश्च ॥

महाष्टम्यां कालरात्रीं मद्रिकापूजा निर्णयः—

नाष्टमी सप्तमीयुक्ता सप्तमी नाष्टमीयुता । नवम्या सह कार्यः स्यादष्टमी सर्वदा बुधैः ॥ अष्टमी सप्तमी युग्मे महोत्साहे महोत्सवः ॥ इति वाक्यात् नवमीयुक्तायाः प्राशस्त्याभिधानात् सति सम्भवे सप्तमीविद्धा सर्वथा वर्जनीया ॥

यदि सूर्योदये न स्यान्नवमी वापरेऽहनि । सर्वसिद्धिं प्रदास्यामि भद्रायामर्चिताप्यहमितिवचन भद्रकाल्यार्चनपरेण महाष्टम्यां निशीथकाले पूजा कर्तव्या ॥ दक्षयज्ञविनाशिन्या अर्धरात्रे प्रादुर्भावात् ॥ तत्राष्टम्यां महाकाली दक्षयज्ञविनाशिनी । प्रादुर्भूता महाघोरा ह्यर्द्धास्ते चन्द्रमण्डले ॥ इति ब्रह्मवचनात् ॥ सप्तमीविद्धां न कुर्वीत मुख्यशुद्धाष्टम्यां कालरात्रिं कुर्यात् ॥

अष्टम्यां सायं सन्ध्योत्तरं देवीपूजा कार्या ॥ सङ्कल्प्य—ॐ अद्येह मम दुर्भिक्षादिदुःखनिवृत्ति दीर्घायुष्य-परमानन्द-परमपदगमन-दशाश्वमेधफल-ध्वज-मालाकुल-विमानवरारोहण-शाश्वतकालाऽवच्छिन्न हर्षविजयकामः श्रीदुर्गादेव्याः पूजनं ध्यानं चाहं करिष्ये ॥ गणेश-दीपपूजनार्घस्थापनं कृत्वा—ध्यानम्—जटाजूटसमायुक्तां मूर्द्धेन्दुकृतशेखराम्। लोचनत्रयसम्पन्नां पद्मेन्दुसदृशाननाम् ॥० (पृ० २३८) आवाहनम्—एहि दुर्गे महाभागे ! रक्षार्थं मम सर्वदा । आवाहयाम्यहं देवि ! सर्वकामार्थसिद्धये ॥

अस्यां मूर्तौ समागच्छ स्थितिं मत्कृपया कुरु । रक्षां कुरु सदा भद्रे ! विश्वेश्वरि ! नमोऽस्तु ते ॥ ॐ एतन्तेति भगवति दुर्गे ! इहागच्छ इह तिष्ठेह सन्निहिता भव इह स्थिरा भव सुप्रसन्ना भव वरदा भव ॥ ॐ जयन्ती मङ्गला कालीति दुर्गे दुर्गे रक्षणि स्वाहा ॐ दुर्गायै नमः इति मन्त्रेण आसन-पाद्यार्घ्य-पञ्चामृत-स्नानाचमन-शुद्धोदकस्नान-रक्तवस्त्र-भूषण-सिन्दूर-चन्दनाक्षत-पुष्प-कज्जल-धूप - दीप - नैवेद्य - ताम्बूल-

दक्षिणान्तं कृत्वा आवरणं पूजयेत् ॥ देव्या दक्षिणभागे एकादशगौरीः ॐ ह्रीमादिनमोन्तं सर्वत्र पूजयेत्—ॐ ह्रीं जयन्त्यै नमः । मङ्गलायै नमः । काल्यै० । भद्रकाल्यै० । कपालिन्यै० । दुर्गायै० । क्षमायै० । शिवायै० । धात्र्यै० । स्वाहायै० । स्वधायै० । अर्घादि नैवेद्यान्तैः पूजयेत् ॥ देव्या पृष्ठभागे द्वादशदेवी पूजनं कुर्यात्—ॐ ह्रीं उग्रचण्डायै नमः । प्रचण्डायै० । चण्डोग्रायै० । चण्डनायिकायै० । चण्डायै० । चण्डवत्यै० । चण्डरूपायै० । चण्डिकायै० । चण्डवीरायै० । चण्डमायायै० । चण्डमुण्डप्रभञ्जन्यै० । चण्डविक्रमायै नमः ॥ प्रत्येकं सम्पूज्य, देव्या वामभागे नवदेवीः पूजयेत्—ॐ ह्रीं उग्रदंष्ट्रायै नमः । शुभ्रदंष्ट्र्य० । करालिन्यै० । भीमनेत्रायै० । महाकाल्यै० । विशालाक्ष्यै० । मङ्गलायै० । जयायै० । विजयायै नमः । देव्यग्रभागे षोडश देवीः पूजयेत्—ॐ ह्रीं मङ्गलायै नमः । नन्दिन्यै० । रुद्रायै० । लक्ष्म्यै० । कीर्त्यै० । यशस्विन्यै० । पुष्ट्यै० । मेधायै० । शिवायै० । साध्यै० । यशोवत्य० । शोभायै० । जयायै० । धृत्यै० । आनन्ददायै० । सुनन्दायै नमः ॥ देव्यग्रभागे चतुःषष्टि देवीः—ॐ ह्रीं बीजायै नमः । मङ्गलायै० । भद्रायै० । धृत्यै० । शान्त्यै० । शिवायै० । क्षमायै० । सिद्ध्यै० । तुष्ट्यै० । पुष्ट्यै० । उमायै० । श्रियै० । ऋद्ध्यै० । रत्यै० । दीप्तायै० । कान्त्यै० ।

यशोदायै० । लक्ष्म्यै० । ईश्वर्य्यै० । वृद्ध्यै० । शक्त्यै० । जयावत्यै० । ब्राह्म्यै० । जयन्त्यै० । अपराजितायै० । अजितायै० । मानस्यै० । दित्यै० । मायायै० । महामायायै० । मोहिन्यै० । रति-लालसायै० । धात्र्यै० । तारायै० । विमलायै० । गौर्य्यै० । शरण्यायै० । कौशिक्यै० । मत्यै० । दुर्गायै० । क्रियायै० । अरुन्धत्यै० । घण्टायै० । कर्णायै० । कपालिन्यै० । रौद्र्यै० । काल्यै० । मायूर्यै० । त्रिनेत्रायै० । स्वरूपिण्यै० । बहुरूपायै० । रिपुहन्त्र्यै० । अम्बिकायै० । चर्चिकायै० । सुरपूजितायै० । वैवस्वत्यै० । कौमार्यै० । माहेश्वर्य० । वैष्णव्यै० । महालक्ष्म्यै० । शिवदूत्यै० । कार्तिक्यै० । कुशिकायै० । चामुण्डायै नमः ॥ अष्टमातृकाणामष्टदिक्षु पूजनं कुर्यात्—ॐ ह्रीं ब्रह्माण्यै नमः । माहेश्वर्यै० । कौमार्यै० । वैष्णव्यै० । वाराह्यै० । इन्द्राण्यै० । चामुण्डायै० । महालक्ष्म्यै० । मध्ये चण्डिकायै नमः ॥ देव्या अग्रभागे भैरवाय नमः इति पूजयेत् ॥

भैरवं परमं देवं सर्वकामप्रसाधनम् । पूजयाम्यूर्ध्वतो देव्याः सर्वाप्तिकफलप्रदम् ॥

श्रीपरमेश्वर्यै जल-दुग्ध-कुश-दधिवर-तण्डुल-यव-सर्षपादिदशसहस्रवर्षावच्छिन्न-दुर्गालोक-महीपतित्व-काम एषोऽष्टाङ्गोऽर्घो भगवत्यै दुर्गादेव्यै मया दत्तः दुर्गे दुर्गे रक्षिणि स्वाहा दुर्गादेव्यै नमः ।

इत्यर्घं दत्वा चन्दनं दद्यात्॥ अग्निष्टोमयज्ञफलप्राप्तिकामनया चन्दनेन भगवत्यै दुर्गादेव्यै अनुलेपनं दत्तं दुर्गादेव्यै नमः॥

बिल्वपत्रम्—सुधोद्भवं च श्रीवृक्षं शङ्करस्य सदा प्रियम्। पवित्रं ते प्रयच्छामि बिल्वपत्रं सुरेश्वरि॥ दुर्गा०

बिल्वपत्रमालाम्—चन्दनेन समालिप्ते कुंकुमेन विलेपिते। बिल्वपत्रकृता माला गृहाण सुरवन्दिते॥ दुर्गा०

सिंहपूजा—ॐ ह्रौं ह्रः महाशार्दूलवितानाय पिंगललोचनाय नमः॥

देव्याः षडङ्गपूजा—ॐ कालीवज्रेश्वरीलोहदंष्ट्रायै स्वाहा हृदयाय नमः॥ ॐ कालीवज्रे० स्वाहा शिरसे०। ॐ कालीवज्रे० स्वाहा शिखायै वषट्। ॐ कालीवज्रे० स्वाहा कवचाय हुम्। ॐ कालीवज्रे० स्वाहा नेत्राभ्यां वौषट्। ॐ कालीवज्रे० स्वाहा अस्त्राय फट्॥

अस्त्रपूजा—ॐ त्रिशूलाय नमः। खड्गाय०। चक्राय०। तीक्ष्णबाणाय०। शक्त्यै० इति दक्षिणे॥

ॐ खट्वाङ्गाय नमः। पूर्णचापाय०। पाशाय०। अंकुशाय०। घण्टाय नमः इति वामे॥

सिंहासनपूजा—वज्रनखदंष्ट्रायुधाय महासिंहाय हुँ फट् नमः॥

विजयो जयदो जेता विप्रभेत्ता भयङ्करः। दुःखहा धर्मदः शान्तः सर्वारिष्टविनाशकः॥

इत्यष्टौ तव नामानि तस्मात् सिंहपराक्रमः । तेन सिंहासनो नित्यं नाम्ना देवेषु गीयते ॥
त्वयि स्थितः शिवः साक्षात् त्वयि शक्तः सुरेश्वरि ! त्वयि स्थितो हरो देवस्त्वदर्थं तप्यते तपः ॥
नमस्ते सर्वतोभद्र भद्रतो नवभूपते । त्रैलोक्यजयसर्वस्व सिंहासन! नमोऽस्तु ते ॥

खड्गपूजा-असिविसर्जनं-असिरूप महाखड्गस्तीक्ष्णधारो दुरासदः । श्रीगर्भो विजयश्चैव धर्मराजस्तथैव च ॥
इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा । नक्षत्रं कृत्तिका ते तु गुरुदेवो महेश्वरः ॥
रोहिणी च शरीरं ते धारादेवो जनार्दनः । पिता पितामहो देवस्त्वं मां पालय सर्वदा ॥
नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्रः कृशोदरः । विशुद्धधर्मा सततं तीक्ष्णधारस्तथैव च ॥
इयं येन हता क्षोणी हतश्च महिषासुरः । तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः ॥

क्षुरिकापूजा–सर्वायुधानां प्रथमं निर्मितासि पिनाकिना । शूलायुधाद्विनिष्कृष्य कृत्वा मुष्टिग्रहं शुभम् ॥
चण्डिकाय प्रदत्तासि सर्वदुष्टविनाशिनि । तथा विस्तारिता चासि देवानां प्रतिपादिता ॥
सर्वसत्वाङ्गभूतानि सर्वदुष्टनिवारिणि । क्षुरिके रक्ष मां नित्यं शान्तिं यच्छ नमोऽस्तु ते ॥

कट्टारक०–कट्टारक ! जगद्रक्ष ! रक्ष वाजिधनानि च । मम देहं सदा रक्ष कट्टारक ! नमोऽस्तु ते ॥

धनुः०—सर्पायुधमहाशस्त्र सर्वदेवारिसूदन। चाप! मां समरे रक्ष सायकैः सुरसेवितः॥
धृतं कृष्णेन रक्षार्थं संहाराय हरेण च। त्रयीमूर्तिश्च त्वं देव! धनुरस्त्रं नमाम्यहम्॥
चर्म०—चर्मप्रदस्त्वं समरे सर्वसैन्यस्य रक्षकः। रक्ष मां रक्षणीयोऽहं त्वयाऽनघ नमोऽस्तु ते॥
वारण०—खड्गायुधानां त्राता त्वं वारणः सर्ववारणः। वीराणां देहि धीरत्वं वारणं सिद्धिनायक!॥
मर्दल०—नर्त्तकीनर्त्तकश्चैव वल्लभ! त्वं नृपस्य च। मृदुमर्दल मां रक्ष गम्भीरध्वनिमर्दल॥
दुन्दुभि०—दुन्दुभैश्च सपत्नानां घोषो हृदयकम्पनः। त्वत्पूजकानां सौम्यानां तथा विजयवर्द्धनः॥
यथा जीमूतघोषेण हृष्यन्ति वरवारणाः। तथास्तु तव शब्देन घोषोऽस्माकं भयावहः॥
बाण०—कामदेवस्य देवानां सफलाश्चार्जुनस्य च। रामस्य च यथाबाणास्तथास्माकं भवन्त्विह॥
त्रोण०—रक्तवृक्षस्थितं त्वं च पूर्णमायुधसायकैः। संग्रामे विजयं नित्यं त्रोणकाय नमोऽस्तु ते॥
कुन्त०—पाश पातय शत्रुं त्वं त्वनया लोकमायया। गृहाण जीवितं तेषां मम सैन्यं च रक्षताम्॥
पताका०—नागकिन्नरगन्धर्वयक्षभूतमहोरगाः। प्रमथाश्च महादेवो भूतेशो मातृभिः सह॥
शक्रसेनापतिस्कन्दो वरुणश्चाश्रितस्त्वयि। प्रदहन्तु रिपून् सर्वान् विजयं च स गच्छतु॥

यानि मुक्तानि रिपुभिर्भूषणानि समन्ततः। निहतानि सदा तानि त्वया दुष्प्रेक्ष्यतेजसा॥
कालनेमिवधे युद्धे तथा त्रिपुरघातने। हिरण्यकश्यपोर्युद्धे यथा देवासुरे तथा॥
शोभितासि सुरैर्वन्द्या शोभसे संयुगे ततः। नीलां श्वेतमिमां दृष्ट्वा विनश्यन्तु ममारयः॥

ध्वजपूजा—शक्रकेतुर्महावीरः सुवर्णस्त्वय्युपासितः। दयाप्रधानयोगानां कुरु रक्षां रिपोर्भयात्॥
वीणा०—शारदावल्लभे! त्वं हि अङ्गनाशतभूषिते। वीणे! त्वं रक्ष मां नित्यं विद्यधनृपवल्लभे॥
जिरह०—शर्मदस्त्वं हि समरे धर्म सैन्ययशोधने। रक्ष मां रक्षणीयोऽहं तवानघ नमोऽस्तु ते॥
कुण्डल०—प्राणहन्त्री रिपुस्त्वं चामलयाऽऽलोकमालया। गृहाण जीवितं तेषां सैन्यं च मम रक्षताम्॥
चामरम्०—शशाङ्ककरसङ्काशो हिमडिण्डिमपाण्डुरः। प्रेत्सारयाशु दुरितं चामरामरवल्लभ॥
छत्रम्०—यथाम्बुदं छादयति शिवायेमां वसुन्धराम्। तथा छादय मां छत्र विजयारोग्यवर्द्धय॥
शंखम्०-पुण्यदः शङ्ख! पुण्यानां मङ्गलानां च मङ्गलम्। विष्णुना त्वं धृतो नित्यमतःशान्तिं प्रयच्छ मे॥

श्रीपरमेश्वर्यै नानापुष्प-माल्यःदीपमाला-नानापकान्न-कदलीफलाम्रेक्षु-नारङ्ग-बीजपूर-मूलक- कूष्माण्ड - ताम्बूल-पूगीफलेत्यादि मिष्टमिष्टद्रव्यं यथाशक्ति दत्वा रक्तपुष्पाञ्जलिमादाय स्तुतिम्—

ॐ दुर्गां शिवां शान्तिकरीं ब्रह्माणीं ब्रह्मणः प्रियाम्। सर्वलोकप्रणेत्रीं च प्रणमामि सदाम्बिकाम्॥
मङ्गलां शोभनां शुद्धां निष्कलां परमां कलाम्। विश्वेश्वरीं विश्वमातां प्रणमामि सदा उमाम्॥
सर्वदेवमयीं देवीं सर्वरोगभयापहाम्। ब्रह्मेशविष्णुनमितां चण्डिकां प्रणमाम्यहम्॥
विन्ध्यस्थां विन्ध्यनिलयां दिव्यस्थाननिवासिनीम्। योगिनीं योगजननीं चण्डिकां प्रणमाम्यहम्॥
ईशानमातरं देवीमीश्वरीमीश्वरप्रियाम्। प्रणमामि सदा दुर्गां संसारार्णवतारिणीम्॥
य इदं पठति स्तोत्रं शृणुयाद् वापि यो नरः। स मुक्तः सर्वपापैस्तु मोदते दुर्गया सह॥—प्रणमेत्

अग्निस्थापनविधिना अग्निस्थापनं कृत्वा होमं कुर्यात्॥ बलिदानविधिः, छागसेचनम्—

स्वयम्भूर्वासुदेवश्च शङ्करश्च महोदयः। सदाराश्च सपुत्राश्च सगणाश्च सशक्तयः॥
प्रेक्षन्तु त्वां पशुश्रेष्ठमेते विश्वैकहेतवः॥ छागाय नमः इति अर्घ्य-चन्दन-पुष्प-धूप-दीप-नैवेद्यान्तैः पूजां विधाय खड्गाय नमः इति खड्गं सम्पूजयेत्॥[१]

---

१ अत्र प्रसंगतश्छाग-महिषादि रुधिरेण तृप्तिमाह। मेषरुधिरेण एकवर्षं तृप्तिः। छागरुधिरेण दश वर्षं तृप्तिः। महिषरुधिरेण शतवर्षं तृप्तिः। स्वदेहरुधिरेण सहस्रवर्षं तृप्तिः।

छागोत्सर्गसङ्कल्पः—ॐ श्रीमद्दुर्गादर्शनाभिवन्दनस्पर्शनतर्पणजनितपूर्वकं सदारापत्यस्य ममाखिलापच्छान्तनानाविधकल्याणोत्पत्ति-दीर्घायुष्य-बल-पुष्टिवृद्धिपूर्वकं दुर्गाप्रीतिकामः श्रीदुर्गादेव्यै अमुक छागबलिं वह्निदैवतं नमः ॥

पशुं गायत्रीं श्रावयेत्—ॐ पशुपाशाय विद्महे शिरच्छेदाय धीमहि । तन्नो पशुः प्रचोदयात् ॥ अञ्जलिं बध्वा पशुं प्रार्थयेत्—यज्ञार्थं पशवः सृष्टा यज्ञार्थं पशुघातनम् । अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥

शिवादत्तैरिमैः पिण्डैरतस्त्वं शिवतां गतः । अपत्यं च पशो हि त्वं चाशिवं च शिवोऽसि हि ॥
पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः । चण्डिकाप्रीतिदानेन मम चापदुविनाशय ॥
पशुरूपं परित्यज्य गन्धर्वस्त्वं स्वरूपधृक् । गौरीलोकं समासाद्य मम कल्याणदो भव ॥
पशुपाशविमोक्षाय हेमकूटस्थिताय च । पशवे च नमस्तुभ्यं नमस्ते बलिरूपिणे ॥
छेद्योऽसि बलिरूपस्त्वमाज्ञया परया गुरोः । छेदभेदोद्भवं दुःखं क्षमस्व पशुरूपधृक् ॥
पशुयोनिप्रसूतोऽसि पूजा होमादिकर्मणि । तुष्टा भवति सा देवी सरक्तैः पिशितैस्तव ॥

ॐ कालीकाली वज्रेश्वरी लोहदण्डाय नमः ॥ पूर्वोक्तैरसिविसर्जनादिमन्त्रैः खड्गं प्रणम्य श्रीपरमेश्वरीं

ध्यात्वैकप्रहारेण छिन्द्यात् । कर्पूरमिश्रितं रुधिरं समर्पयेत् ॥ पुनर्गोतमोक्तछागोत्सर्गविधिः ॥ कुशाग्रेण छागं प्रोक्ष्य—ॐ अग्निः पशुरासीत्तेनायजन्तसऽएतँल्लोकमजयद्यस्मिन्नग्निः सतेलोको भविष्यतितञ्जेष्यसिपिबैताऽअपः॥ ॐ वायुः पशुरासीत्तेनायजन्त० ॥ ॐ सूर्यः पशुराशीत्तेनायजन्त० इत्यादिना। ॐ चन्द्रः पशुरासीदित्यादि ॥ ॐ गन्धर्वः पशुरासीदित्यादिना ।

छागं हस्तेन स्पृशेत्—ॐ वाचं ते शुन्धामि । ॐ शिरस्ते० । ॐ शृंगे ते० । ॐ चक्षुस्ते० । ॐ कर्णौ ते० ॐ वक्त्रं ते० । ॐ कण्ठं ते० । ॐ मेढ्रं ते० । ॐ सर्वगात्राणि ते शुन्धामीति अक्षतान् पशुगात्रे निक्षिप्य ॥ ॐ वाक् ते आप्यायताम् । ॐ शिरस्त आ० । ॐ शृंगे त आ० । ॐ चक्षुस्त आ० । ॐ कर्णौ त आ० । ॐ वक्त्रं त आ० । ॐ कण्ठं त आ० । ॐ मेढ्रं त आ० ॥ ॐ सर्वगात्राणि त आप्यायताम् ॥ पशोरुपरि पुष्पाणि निक्षिप्य प्रार्थयेत्—

शिरः कण्ठे ललाटे च पादयोर्जङ्घयोस्तथा । नेत्रयोः सर्वगात्रेषु मुञ्चन्तु पशुदेवताः ॥

छागं प्रोक्ष्य पशुं गायत्रीं श्रावयेत्—ॐ पशुपाशाय विद्महे शिरश्छेदाय धीमहि। तन्नोछागः प्रचोदयात् ॥ पुष्पाक्षतैः पूजयेत्—सौं क्लीं फेंवारिसरस्वति लीयतां नमः फट् वौषट्। इत्यादि क्रमेण सौं पादयोः

पृथिवी लीयताम्। साँ पायौ मित्रो लीयताम्। साँ उपस्थे जलं लीयताम्। साँ चक्षुषोस्तेजो लीयताम्। साँ कर्णयोर्नभो लीयताम्। साँ सर्वाङ्गेषु दिशो लीयताम्। साँ मनसि कालो लीयतां फट् वौषट्॥ तत्तत्स्थाने लीनं कृत्वा तत्तद्दशाङ्गं स्पृशेत्—ॐ चामुण्डायै नमः कपाले। ॐ यमाय नमः शृङ्गयोः। ॐ शशि-भास्कराभ्यां नमः नेत्रयोः। ॐ बृहस्पतये नमः कर्णयोः। ॐ चन्द्राय नमः कपोलयोः। ॐ रुधिरवदनाय नमः मुखे। ॐ रक्तदन्तिकायै नमः दन्ते। ॐ पृथिव्यै नमः नासिकयोः। ॐ महादेवाय नमः कण्ठे। ॐ पृथिव्यै नमः उदरे। ॐ प्रजापतये नमः मेदसि। ॐ कूर्माय नमः पृष्ठे। ॐ साङ्गोपाङ्गाय नमः पुच्छे॥ ततो यज्ञार्थं पशवः सृष्टा० (पृ. २६१) मन्त्रेण पशुं प्रार्थयित्वा खड्गं पाद्यादिना सम्पूज्य—ॐ मध्ये ब्रह्मणे नमः। ॐ अग्रे महादेवाय नमः। ॐ पृष्ठे यमाय नमः। ॐ आधारे कालाय नमः॥ पूर्वोक्तं असिविसर्जनं पठित्वा छागस्कन्धे घर्षयेत् यावद्धात्रशिरोबलिं न चालयति तावद्बलौ काल्यै नमः इति मन्त्रेण जलं क्षिपेत्। रुधिरसेकसङ्कल्पः—अद्येह दशवर्षावच्छिन्नदुर्गाप्रीतिकामनया इदं छागरुधिरं भगवत्यै मया दत्तम्॥ अज-मेष-महिषादि बलिदाने तु—अद्य महाष्टम्यामर्द्धरात्रे मम सर्वापच्छान्तिपूर्वकसर्वकल्याणोत्पत्तिदारुण

ग्रहपीडोपशमनशत्रुमारणपूर्वकदिग्विजयराष्ट्रप्राप्तिकामनया इमं महिषं यमदैवतमजं वह्निदैवतं मेषं वरुणदैवतं दक्षयज्ञविनाशिन्यै महाघोरायै कोटियोगिनीपरिवृतायै भद्रकाल्यै ह्रीं दुर्गे! रक्षणि स्वाहा श्रीदुर्गादेवीप्रीतये घातयिष्ये॥ ततो नाममन्त्रेण कूष्माण्डं सम्पूज्य—ॐ अद्येह सशैलवनकाननदानजन्यफलप्राप्तिकाम इदं कूष्माण्डफलं वनस्पतिदैवतं भगवत्यै दुर्गादेव्यै मया दत्तम् इति सङ्कल्प्य कूष्माण्डफलं देवीप्रीतये दद्यात्।

महिषरुधिरदानसङ्कल्पः—अद्य शतवर्षावच्छिन्नदुर्गाप्रीतिकामनया इदं महिषरुधिरं भगवत्यै दुर्गादेव्यै मया दत्तं नमः॥ पशुकपालं देव्या पुरतो वामभागे संस्थाप्य पुष्पाक्षतयुतं दीपं तत्कपालोपरि दद्यात्। ततोऽवशिष्टरक्तं धृत्वा कुशादिभिरष्टधा विभज्य तेन पूर्वे चामुण्डां तर्पयामि। तद्दक्षिणे योगिनीं त०। पश्चिमे डाकिनीं त०। उत्तरे भैरवीं त०। आग्नेये विदारिकां त०। नैर्ऋत्ये पापराक्षसीं त०। वायव्ये पूतनां त०। ईशाने कालिकां तर्पयामि।

खड्गाय खलनाशाय भक्तकार्याय तत्परः। पशुच्छेदस्त्वया कार्यः खड्गरूपिन्नमोऽस्तु ते॥ खड्गं प्रणमेत्

बहुशोऽजमहिषाघाते—ॐ अद्य तत्संख्यावर्षावच्छिन्नदुर्गाप्रीतिकामनया एतान् छागान् वह्निदैवतान्

एतान् मेषान् वरुणदैवतान्, एतान् महिषान् यमदैवतान् श्रीदुर्गादेव्यै प्रीतये अहं घातयिष्ये।
नर-महिष-छाग-मत्स्याभावे[1] बीजपूरकं कूष्माण्डं कर्कटीफलं मूलकं घृतं मधु-शर्करा-नारिकेलादिकं भगवत्यै दुर्गादेव्यै क्रमेण निवेदयेत्॥ कदलीं वृन्ताकं जम्बीरं नारङ्गं कोशातकं च दद्यात्॥

स्तुतिः—जय देवि! जगन्मातर्जय पापौघहारिणि। जय जन्मजराव्याधि-तृष्णादावानलाकृते॥
जय सर्वविपत्तिघ्नि जय त्रिदशवन्दिते! जय नित्यानन्दरूपे! जय कल्याणदायिनि॥
जय शत्रुक्षयकरि! जय रोगप्रणाशिनि! जय भीमे! जयाघोरे! जय संकटतारिणि॥
जयामृत-रसास्वाद-तुन्दिलानन्दविग्रहे। त्रिनेत्रे विकरालास्ये मुण्डमालाविभूषिते॥
सर्वासुरक्षयकरि खड्ग-खट्वाङ्गधारिणि। महाघोरे महारावे दैत्यदर्पनिषूदिनि॥
इदं पशुबलिं देवि! गृहीत्वा कालरात्रिके। प्रीता भव महाचण्डि रक्ष मां शरणागतम्॥
आयुर्देहि धनं देहि भाग्यं कीर्तिं च देहि मे। स्त्रियं देहि सुतान् देहि सर्वान् कामांश्च देहि मे॥

---

१ महिषत्वेन कूष्माण्डं बीजपूरं नरस्ततः। छागाभावे कर्कटी स्यान्मत्स्याभावे तु मूलकम्॥
मधुत्रयं घृत-मधु-शर्करा परिकीर्तितम्। नारिकेलोदकं पुण्यं रहस्यं हि शिवोदकम्॥

उग्रचण्डे प्रचण्डासि प्रचण्डकरवालिनि। महाचण्डोग्रदोर्दण्डे विश्वेश्वरि! नमोऽस्तु ते॥
रक्ष मां शरणापन्नं त्वत्पदार्पितमानसम्। हर पापं हर क्लेशं हर शोकं हरासुखम्॥
हर रोगं हर क्षोभं हर दैन्यं हरप्रिये।
गुह्यकालि जगद्धात्रि सर्वान्तर्यामिनीश्वरि। गृहित्वेमं पशुबलिं यथोक्तफलदा भव॥
कायेन मनसा वाचा त्वत्तो नान्या गतिर्मम। अन्तश्चरसि भूतानां दृष्टिस्त्वं परमेश्वरि![1]॥

स्तुत्वा गीतवाद्यादिकं च कृत्वा पुनर्देव्यै स्तोत्रपाठादिना पुष्पाञ्जलिं दद्यात्॥ श्रीपरमेश्वरीप्रीतये नवार्णमन्त्रेणाऽथवा जयन्ती मङ्गलेति मन्त्रं लक्षं सहस्रं अष्टोत्तरशतं वा यथाशक्तिहोमं कृत्वा इष्टदेवता-कुलदेवताभ्यां च सम्पूज्याऽनुमतिं दत्वा ब्रह्माण्याद्यष्टदलेषु बलिदानं कुर्यात् यथा—ब्रह्माणी माहेश्वरी कौमारी वैष्णवी वाराही नारसिंही ऐन्द्री शिवदूती मध्ये च चण्डिका। बलिदानमन्त्रः—

ॐ भगवति ब्रह्माणि एष बहुघृत-दीप-मांससमन्वित माषभक्तबलिं तुभ्यं नमः॥ एवं क्रमेण सर्वाभ्यो मातृभ्यो बलिं दद्यात्॥ सामान्यबलिदानम्—ॐ नमः कपालीग्रह-नक्षत्र-सुरासुर-गन्धर्व-यक्षेश-

१ स्तुतिमेतां पठित्वैव दण्डवत् प्रणमेद् भुवि। पद्भ्यां कराभ्यां जानुभ्यां मनसा वचसा दृशा। उरसा शिरसा चेति प्रणामोऽष्टांग ईरितः॥

विद्याधर-गरुड-महोरग-किन्नर-गजेन्द्र-देवता-राक्षस - भूत - क्रव्याद - पिशाच - मनुष्य - मातृगण-योगिनी-शाकिनी-डाकिनीगणा इमां बलिं गृह्णन्तु स्वाहा । पूर्ववत् दद्यात् ॥

ॐ शिवाः कङ्कालवेतालाः पूतनाजृम्भकादयः । ते सर्वे तृप्तिमायान्तु बलिदानेन तोषिताः ॥

बलिं दद्यात् ॥ क्षेत्रपालाय कृच्छ्रान्नं वा दध्यक्षतबलिं दत्वा होमं समाप्य होमान्ते श्रीपरमेश्वर्या विशेषतः पूजां कुर्यात् ॥ इति महाष्टम्यां कालरात्रिविधिः ॥

★

महानवमी[1] पूजाविधिः

पूजनविधिः—अद्येहाश्विनशुक्लनवम्यां सकलपापक्षयपूर्वकधर्मयशोदीर्घायुष्यब्रह्मलोकगमनब्रह्मेन्द्ररुद्र-विष्ण्वादिप्राप्यपदप्राप्तिकामस्त्रिशूलिनीदुर्गाचण्डिकापूजनमहं करिष्ये ॥ ॐ त्रिशूलिनीहागच्छेह तिष्ठेत्यावाह्य 'त्रिशूलिन्यै नमः' मन्त्रेण पाद्यादि नैवेद्यान्तैः सम्पूज्य तत्र दुर्गां शिवां शाङ्करीं चण्डिकां च सम्पूज्य अष्टम्यामिवोक्तप्रकारेण बलिदानं कुमारीपूजनं शस्त्रास्त्रपूजनं च कुर्यात्। इति महानवमीविधिः।

[2]दशम्यामपराजिता पूजा—अद्याश्विनशुक्लदशम्यामपराजिताया विजयसिद्ध्यर्थं नवदुर्गापूजाया न्यूना-

१. सा तु पर्वयुता ग्राह्या तथा हेमाद्रौ स्कान्दे—पूर्वविद्धा प्रकर्त्तव्या नवमी बलिकर्मणि। न कुर्यान्नवमीं तात दशमीसंयुतां सदा॥ पूर्वेविद्धा शुभेति प्रतिभाति। अष्टमी दशमी सन्धौ तृतीयं खलु कथ्यते। तस्मिन् कृते बलिदाने पुत्रनाशो भवेद् ध्रुवम्॥ धौम्यः—शुद्धा नवमी महानवमी न विद्धा। शुद्धाया अभावे अपराह्ण इति यत्र नवमी तत्रैवेति। नवम्यामपराह्णे तु बलिदानं प्रशस्यते। दशमीवर्जयेत्तत्र नात्र कार्या विचारणा॥ मदनरत्नम्। ब्रह्मवैवर्त्तेऽपि—नन्दायां ज्वलते वह्निः पूर्णायां पशुघातनम्। भद्रायां गोकुलक्रीडा तत्र राज्यं विनश्यति॥ यदा तु नवमी त्रुटिता तदष्टम्यां नवमीपूजा कार्या।

२ श्रवणर्क्षेण संयुक्ता दशमी शुक्लपक्षगा। इषे मासि स्थिता ज्ञेया विजयादशमी तिथिः। सा नवमीविद्धा कर्तव्या न त्वेकादशीयुता। मध्याह्ने विजयमुहूर्त इति केषांचिन्मतम्। सन्ध्या समये केषांचिन्मतम्। विजयाख्योऽष्टमस्मृतः—वसन्तराजः। किञ्चित्सन्ध्यामतिक्रम्य किञ्चिदुत्पन्न-तारकः। विजयो नाम योगोऽयं सर्वकर्मसु सिद्धिदः॥—गर्गसंहितायाम्। श्रवणयुक्ता शुद्धा दशमी। अथवा नवमीयुता वा विजयादशमी।

तिरिक्तपरिपूरणार्थमपराजितादेवीपूजनपूर्वकविसर्जनमहं करिष्ये ॥

चन्दनेनाष्टदलं लिखित्वा तन्मध्ये मृण्मयपात्रत्रयं संस्थाप्यावाहयेत् अथवा पूगीफलपुष्पाक्षतेष्वावाहयेत् । मध्ये—ॐ अपराजितायै नमः । दक्षिणे—ॐ क्रियासिद्ध्यै जयायै नमः । वामे—ॐ उमायै विजयायै नमः । नाममन्त्रैः प्रतिष्ठाप्य सर्वाभरणभूषिताम्० इत्यादिना । खड्गचर्मधरां वराभयहस्तां त्रिनेत्रा-मीषत्प्रहसितवदनां सर्वाङ्गसुन्दरीमावाह्य चतुर्भुजां पीतवस्त्रामपराजितां ध्यात्वा—ॐ अपराजितायै नमः । ॐ जयायै नमः । ॐ विजयायै नमः । नाममन्त्रैः पाद्यार्घ्याचमन-वस्त्राभूषण-चन्दनाक्षत-पुष्प-धूप-दीप-नैवेद्य-ताम्बूलादिदक्षिणान्तं दत्वा, प्रार्थयेत्—

चारुणा मुखपद्मेन विचित्रकनकोज्वला । जया देवी शिवे भक्तान् सर्वान् कामान् ददातु मे ॥
काञ्चनेन विचित्रेण केयूरेण च भूषिता । जयप्रदा महामाया शिवभावितचेतसा ॥
विजया च महाभागा ददातु विजयं मम । हारेण शुचिवस्त्रेण भास्वत्कनकमेखला ॥
अपरेयं रुद्ररता करोतु विजयं मम ॥

हरिद्रासर्षपदूर्वायुक्तपीतवस्त्रपोटलिकां पीतसूत्रेण ॐकारमुच्चरन् बद्ध्वा एतन्तेति (पृ.२४८)प्रतिष्ठाप्याभिमन्त्रयेत्—

सदा पराजिते यस्मात् त्वं लतामुत्तमा स्मृता। सर्वकामार्थसिद्ध्यर्थं तस्मात्त्वां पूजयाम्यहम्॥
भवापराजिते देवि मम सर्वसमृद्धये। पूजितायां त्वयि श्रेयो ममास्तु दुरितं हतम्॥

मन्त्रेणापराजितां देवी समीपे अभिमन्त्रयेत्॥ धारणं दक्षिणबाहौ—

जयदे वरदे! देवि! दशम्यामपराजिते! धारयामि भुजे दक्षे जयलाभाभिवृद्धये॥
बलमाधेहि बलयं मम शत्रौ पराजयम्। तद्धारणाद्भवेयुर्मे धनधान्यसमृद्धयः॥

मूलदेवीं संपूज्य प्रार्थयेत्-रूपं देहि यशो देहि भगं भवति देहि मे। पुत्रान् देहि तथा मातः सर्वान् कामांश्च देहि मे

महिषघ्नि महामाये चामुण्डे मुण्डमालिनि! आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते॥

प्रणमेत्—इमां पूजां मया देवि यथाशक्त्या निवेदिता। रक्षार्थं त्वत्प्रसादाय व्रज स्वस्थानमुत्तमम्॥

ॐकारेण विसर्जनम्—दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते। संवत्सरे व्यतीते तु पुनरागमनं तव॥

देवीमुत्थापयेत्—उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च। कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह॥

गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके। व्रज स्रोतोजलं वृद्ध्यै स्थीयतां च जले त्वया॥

ततः जपपाठ-नवरात्रव्रत-देवीपूजनादि कृतस्य सम्पूर्णकर्मणो दक्षिणासङ्कल्पं पूर्वस्थापितपत्रिकां मृण्मयप्रतिमा-

श्रोत्थाप्य शिविकादि शुभयानोपरि सन्निवेश्य गीतवादित्रनिःस्वनैर्जलसमीपे गत्वा दुर्गे देवि जगन्मातरिति श्लोकेन इमां पूजां मया देवि (पृ० २७०) इति श्लोकेन च जले प्रवाहयेत्। अपराजितापत्रत्रयं तण्डुलत्रयं च ॐ सः ह्रौंसहक वरा ह्रौंसः हुमिति मन्त्रेण प्राशयेत्। ततः शमीवृक्षान्ते गत्वा पूजा—

शमी शमयते पापं शमी लोहितकण्टका। धरिष्यर्जुनबाणानां रामस्य प्रियवादिनी॥
करिष्यमाणपूजायां यथाकालं सुखं मया। तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिता॥

पुष्पाणि साक्षतामार्द्रां शमीमूलगतां मृदम्॥ शमीशाखां च गृहीत्वा शिविकादि यानोपरि सन्निवेश्य गीतवादित्रनिर्घोषैः स्वगृहं प्रत्यानयेत्। ततः स्वजनैःसह वेदोक्तपुराणमन्त्रैरभिषेकं कृत्वा वस्त्रभूषणतिलकादिकं धारयेत्॥ ततो जलसमीपे गोष्ठे नद्यां वा खञ्जनं विलोकयेत्। प्रणमेत्—

नीलग्रीव शुभग्रीव सर्वकामफलप्रद। पृथिव्यामवतीर्णोऽसि खञ्जरीट नमोऽतु ते॥

ब्राह्मणेभ्यो दक्षिणां दत्वा आशीर्वादं गृहीत्वा यथासुखं विहरेत्॥ इति शरत्कालिकदुर्गोत्सवपूजाविधिः॥

★

लक्षवर्तिका दीपदानविधिः

कर्त्ता शुचिराचान्तः । दीपं प्रज्वाल्य नमोस्त्वनन्तायेति (पृ. ९) दीपं सम्पूज्य । अर्घ्यस्थापनं कुर्यात्—ॐ गंगे च यमुनेत्यादिना (पृ० ११)॥ सङ्कल्पः—ॐ अद्येत्यादि मम समस्तजन्म-बाल्य-यौवन-वार्द्धक्यावस्थोपार्जित-कायिक-वाचिक-मानसिक-सांसर्गिकसकलपापक्षयपूर्वकैहिकानेकविधनिरवधिक-भोगानुभवानन्तरे श्रीपरमेश्वरप्रीतिद्वारा विष्णुसायुज्यपदप्राप्तिकामो लक्षवर्त्तिका प्रज्वलनतदङ्गभूत दीप-कलश-गणेशपूजनपूर्वक ब्रह्म-विष्णु-महेश्वरपूजनं प्रधानदेवतापूजनं चाहं करिष्ये । दीपं संपूज्य कलश-गणेशपूजनं (पृ० ९) च कुर्यात् । अन्यकलशमध्ये—ॐ इदं विष्णुरिति मन्त्रेण हैमसिंहासनस्थितं श्रियासहितं विष्णुं पूजयेत् । तद्दक्षिणे ॐ ब्रह्मयज्ञानमिति (पृ. १६) सावित्रीसहितं ब्रह्माणं पूजयेत् । तदुत्तरे—नमः शम्भवायेति मन्त्रेण उमासहितं शिवं पूजयेत् ॥ प्रधानदेवतां गङ्गां च मनोजूति-(पृ० २१)रिति मन्त्रेण प्राणं प्रतिष्ठाप्य षोडशोपचारैः (पृ० १४) पूजयेत् । गरुडं हंसं वृषभं च सम्पूज्य ॥

अङ्गपूजा—ॐ कालाय नमः शिरः पूजयामि । ॐ विष्णवे नमः ललाटं पूजयामि । ॐ अग्नये नमः

नेत्रं पूजयामि। ॐ रवये नमः कर्णौ पूजयामि। ॐ दांताय नमः नासिकां पूजयामि। ॐ निशाकराय नमः मुखं पूजयामि। ॐ रुद्राय नमः कण्ठं पूजयामि। ॐ शेषाय नमः स्कन्धं पूजयामि ॐ जगद्व्यापिने नमः बाहू पूजयामि। ॐ तेजोरूपाय नमः स्तनौ पूजयामि। ॐ महेश्वराय नमः नाभि पूजयामि। ॐ विश्वरूपाय नमः कटिं पूजयामि। ॐ जगतः प्रभवे नमः गुदं पूजयामि। ॐ स्वप्रकाशाय नमः ऊरू पूजयामि। ॐ स्वयं ज्योतिषे नमः जानुनी पूजयामि। ॐ चतुर्व्यूहाय नमः गुल्फौ पूजयामि। ॐ जनाधिपाय नमः पादौ पूजयामि। ॐ परब्रह्मणो नमः सर्वांगं पूजयामि। ॐ धात्रे नमः पादौ पू०। ॐ विधात्रे नमः जङ्घे पू०। ॐ स्रष्टे नमः ऊरू०। ॐ प्रजापतये नमः मेढ्रं पू०। ॐ परमेष्ठिने नमः कटीं०। ॐ अग्निरूपाय नमः नाभिं पू०। ॐ पद्मनाभाय नमः हृदयं पू०। ॐ वेधसे नमः बाहू पू०। ॐ दामोदराय नमः कण्ठं पू०। ॐ हिरण्यगर्भाय नमः मुखं पू०। ॐ ब्रह्मणे नमः शिरः पू०। ॐ विष्णवे नमः सर्वांगं पू०। विशेषोपहारादि समर्पयेत्॥ दीपदानसङ्कल्पः—ॐ अद्येहेत्यादि पूर्वसङ्कल्पसिद्धिरस्तु अमुकगोत्राया अमुक नाम्नी देव्या मम समस्त-जन्म-बाल्य-यौवन-वार्धक्यावस्थोपार्जितकायिक-वाचिक-मानसिक-

सांसर्गिकसकलपापक्षयपूर्वकैहिकानेकविधनिरवधिकभोगानुभवानन्तरं श्रीपरमेश्वरप्रीतये तिल-तैलाक्तान् (घृताक्तान्) सपादलक्षसंज्ञकान् प्रज्वालितान् दीपान् श्रीविष्णवे समर्पयामि नमः ।

पृथक् देवताराधनपक्षे ब्रह्मणे, विष्णवे, ईश्वराय, देव्यै, गङ्गायै, तुलस्यै, सूर्याय, गणपतये समर्पयामीत्यर्पयेत् ।

कांस्यपात्ररौप्यपात्रस्थहेमवर्त्तिकादानमन्त्रः—

रौप्यपात्रस्थितं दीपं हेमवर्त्तिसमन्वितम् । कांस्यपात्रेण सहितं ददामि व्रतपूर्तये ॥

भूयसी दक्षिणा—इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ! न्यूनं सम्पूर्णतां यातु प्रसादात्तव केशव ॥
गृहीत्वाऽपि व्रतं देव यद्यपूर्णं करोम्यहम् । तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्दनः ॥
यस्यस्मृत्येति (पृ० २८) कायेनवाचे (पृ० २८) त्यादिना परमेश्वरं समर्प्य विसर्जनं कुर्यात् ॥

इति लक्षवर्त्तिका-दीपदानविधिः समाप्तः ॥

★

जन्मोत्सवविधिः

जन्मतिथिरौदयिकी ग्राह्या ।

[1]युगाब्दावर्षवृद्धिश्च सप्तमी पार्वती प्रिया । रवेरुदयमिच्छन्ति न तत्र तिथियुग्मता ॥
[2]सूते जन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा । अदृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥
[3]खण्डनं नखरोमाणां मैथुनाध्वगमो तथा । आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत् ॥
[4]कृतान्तकुजयोर्वारे यस्य जन्मतिथिर्भवेत् । अनृक्षयोगसम्प्राप्तौ विघ्नस्तस्य पदे पदे ॥
[5]नवाम्बरधरो भूत्वा पूजयेच्च चिरायुषम् । मार्कण्डेयं नरो भक्त्या पूजयेत् प्रयतस्तथा ॥
तथा दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिम् । प्रह्लादं च हनूमन्तं विभीषणमथार्चयेत् ॥
स्वनक्षत्रं जन्मतिथिं सम्प्राप्य पूजयेन्नरः । षष्टीं च दधिभक्तेन वर्षे वर्षे पुनः पुनः ॥
तिथितत्त्वे एतन्नाममिस्तिलहोमोऽभ्युक्तः ।
[6]सर्वैश्च जन्मदिवसे स्नात्वा मङ्गलवारिभिः । गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥
स्वनक्षत्रं च पितरं तथा देवं प्रजापतिम् । प्रतिसंवत्सरं यत्नात् कर्त्तव्यश्च महोत्सवः ॥
[7] गुडदुग्धतिलानञ्च हस्ते ग्रन्थिं च बन्धयेत् ।
गुग्गुलं निम्बसिद्धार्थं दूर्वागोरोचनादिकम् । सम्पूज्य भानुविघ्नेशौ महर्षिं प्रार्थयेदिदम् ॥

---

१ कृत्यतत्त्वार्णवम् । २ वृद्धमनुः । ३ तिथितत्त्वे स्कान्दे । ४ तत्रैव दीपिकायाम् । कृतान्तः = शनिः । ५ व्यवहारनिर्णये । ६ आदित्यपुराणे । ७ कृत्यचिन्तामणौ ।

अष्टचिरञ्जीविनां स्थापनपट्टिका

प्रार्थना—चिरञ्जीवी यथा त्वं भो भविष्यामि तथा मुने। रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्वदा॥
मार्कण्डेय नमस्तेऽस्तु सप्तकल्पान्तजीवन। आयुरारोग्यसिद्ध्यर्थं प्रसीद भगवन् मुने!॥
चिरञ्जीवी यथा त्वं तु मुनीनां प्रवरद्विजः। कुरुष्व मुनिशार्दूल तथा मां चिरजीविनम्॥
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन। अस्माकमायुरारोग्यसिद्ध्यर्थं वरदो भव॥
सतिलं गुडसम्मिश्रमञ्जल्यर्धमितं पयः। मार्कण्डेयादृषेर्लब्ध्वा पिबाम्यायुर्विवृद्धये॥—पयः पिबेत्

ततो मूलमन्त्रेण मार्कण्डेय-व्यासादीनां नाममन्त्रैश्च पूजाहोममिच्छन्ति कुलाचार्याः॥

प्रयोगः—कर्त्ता [1]सर्वौषधिस्नानपूर्वकं स्नात्वा कृतनित्यक्रियः शुचिराचान्तः प्राङ्मुदङ्मुखोपविश्य सङ्कल्पः—

ॐ अद्येत्यादि देशकालादीन् संकीर्त्य अमुकगोत्रस्य ममायुरारोग्यैश्वर्योदयप्राप्तिकामो जन्मोत्सवकर्म निर्विघ्नपरिसमाप्त्यर्थं दीप-कलश-गणेशपूजापूर्वकं मङ्गलाभिधानकशान्तिकलशस्थापनमहं करिष्ये

दीप-कलश-गणेशपूजां विधाय धूप दीप नैवेद्यादीनि कृत्वा प्रार्थयेत्—

---

१ सर्वौषधिः—मुरामांसीवचाकुष्ठं शैलेयं रजनीद्वयम्। भद्रोचम्पकमुस्ताश्च सर्वौषध्यो दश स्मृताः॥
पञ्चरत्नानि—सुवर्णं रजतं मुक्ता राजावर्त्तं प्रवालकम्। सप्तमृदः—गजाश्वरथवल्मीकसङ्गमाद्रदगोकुलात्।
पञ्चपल्लवानि—अश्वत्थोदुम्बरः प्लक्षश्चूतन्यग्रोधपल्लवाः॥

ॐ वक्रतुण्डमहाकाय कोटिसूर्यसमप्रभ। निर्विघ्नं कुरु मे देव सर्वकामप्रसिद्धये॥ कलशस्थापनम् (पृ. १०)

ततः कलशस्कन्धप्रदेशे—ॐ गणपत्यादिषाञ्चायनान्, ॐ विनायकादिपञ्चलोकपालान्, ॐ आदित्यादिनवग्रहान्, ॐ ईश्वराद्यधिदेवान्, ॐ अग्न्यादिप्रत्यधिदेवान्, ॐ इन्द्रादि दशदिक्पालान्, ॐ ध्रुवाद्यष्टवसून्, ॐ धात्रादिद्वादशादित्यान्, ॐ वीरभद्राद्येकादशरुद्रान्, ॐ गौर्यादिषोडशमातरः, ॐ आवहादि सप्तमरुतः, विनायक-ब्रह्म-विष्णु-रुद्रार्क-वनस्पतीन् यथामिलितोपचारैः पूजयेत्। ब्राह्मणवरणम्, पुण्याहवाचनम् (पृ. ६)

सङ्कल्पः—ॐ अद्येत्यादि ममायुरारोग्यैश्वर्योदयप्राप्तिकामनया गुरुं नारायणं देवं अग्निं प्रजापतिं पितॄन् मार्कण्डेयं व्यासं रामं द्रौणिं कृपं बलिं प्रह्लादं हनुमन्तं षष्ठिकां स्वनक्षत्रं स्वतिथिं अहं पूजयिष्ये॥ मंगलाभिधानकलशे गुरुं नारायणं देवं अग्निं प्रजापतिं पितॄन् स्वस्वनाममन्त्रैश्चतुर्थ्यन्तपदैः पूजयेत्। तत्कलशसमीपे पीठिकोपरि वस्त्रमास्तीर्य तदुपरि अष्टदलपद्मं विलिख्य तत्राष्टदलमध्ये मार्कण्डेयं पूर्वदले व्यासम्। आग्नेयदले रामम्। दक्षिणदले द्रौणिम्। नैर्ऋत्यदले कृपम्। पश्चिमदले बलिम्। प्रह्लादं वायव्यदले। हनुमन्तमुत्तरदले। षष्ठिकामीशानदले। मध्ये तत्समीपे स्वनक्षत्रं स्वतिथिं स्वस्वनामभिः चतुर्थ्यन्तपदैरर्चयेत्॥

प्रार्थयेत्–चिरञ्जीवी यथा त्वं भो भविष्यामि तथा मुने ! रूपावान् वित्तवांश्चैव श्रिया युक्तश्च सर्वदा ॥
मार्कण्डेय नमस्तेऽस्तु सप्तकल्पान्तजीवन ! आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भव ॥

ततः षष्ठिकायै दधिभक्तबलिम्–ममायुरारोग्यवृद्धये षष्ठिकायै एष दधिभक्तबलिस्तुभ्यं नमः ॥

ततः पीतवस्त्रं गुग्गुलं निम्बं सिद्धार्थदूर्वां गोरोचनादिकं धृत्वा तत्र गणेशं भास्करं च पूजयित्वा महर्षिं मार्कण्डेयं प्रार्थयित्वा दक्षिणभुजे धारयेत्–

ॐ मार्कण्डेय महाभाग आयुरारोग्यदायक ! शुभदौ विघ्नहर्तारौ भानुर्विघ्नेश एव तु ॥
धारयामि भुजे दक्षे मम कल्याण हेतवे । पूरयध्वं सदाऽस्माकं कामनांश्च मनोरथान् ॥

ततः स्वगृह्योक्तविधिनाऽग्निं स्थापयित्वा अस्मिन् कर्मणि प्रतिष्ठितदेवताभ्यः प्रधानभूतेभ्यो यथासंख्याकं तिल-यवाज्यहोमं कारयेत् । ततः पूर्णाहुतिं हुत्वा यथाशक्ति गो-भू-हिरण्यादिदक्षिणां दद्यात् । आयुरारोग्य-वृद्ध्यर्थमाज्येक्षणं कुर्यात् ॥

पयःपिबेत्–सतिलं गुडसम्मिश्रमञ्जल्यर्द्धमितं पयः । मार्कण्डेयाद्वरं लब्ध्वा पिबाम्यायुर्विवृद्धये ॥

ततः शान्तिकलशोदकेनाभिषेकादिकं कृत्वा ब्राह्मणान् भोजयेत् । इति जन्मोत्सवविधिः समाप्तः ॥

यमद्वितीया परं भ्रातृपूजाविधिः

शुद्धासने उपविश्यार्घं संस्थाप्य, प्राणानायम्य दीपं प्रज्वाल्याचम्य—ॐ अद्येत्यादि अमुकगोत्रस्य ममायु-
रारोग्यैश्वर्योदयप्राप्त्यर्थं भ्रातृपूजनपूर्वाङ्गत्वेन दीप-कलश-गणेशपूजनपूर्वकं यम-यमुना-यमदूत
सूर्यादिनवग्रहमार्कण्डेयाद्यष्टचिरञ्जीविनां पूजनमहं करिष्ये। (दीप-कलश-गणेश पृ० ९,१०,१४)

षट्दलवसुपत्रपृथिव्यात्मकं पीठं निर्माय तन्मध्ये यममावाह्य पूजयेत्। ॐ मनोजूति (पृ० २१) रितिप्रतिष्ठाप्य
ध्यायेत्—मेघश्यामं प्रसन्नास्यं नानालङ्कारसंयुतम्। महिषस्थं दण्डधरं संस्तुतं पितृभिर्वृतम्॥
नानारूपधरैर्दूतैः श्वेतवस्त्रं भजेद्यमम्॥ भो यम! इहागच्छेह तिष्ठ—

आसनम्—नानारत्नसमायुक्तं कार्तस्वरविभूषितम्। आसनं देव! देवेश! प्रीत्यर्थं प्रतिगृह्यताम्॥
पाद्यम्—पाद्यं गृहाण देवेश! सर्वक्षेमसमर्थ भो! भक्त्या समर्पितं देव लोकनाथ नमोऽस्तु ते॥
अर्घ्यम्—एह्यहि मार्तण्डज पाशहस्त यमान्तकालोकधरामरेश।

भ्रातृद्वितीय कृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते ॥
त्वं कर्मसाक्षी भूतानां शुभाशुभविचक्षणः । गृहाणार्घ्यं धर्मराज वैवस्वत नमोऽस्तु ते ॥
आचमनीयम्-कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् । आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥
स्नानम्—गङ्गा सरस्वती रेवा पयोष्णी नर्मदा जलैः । स्नापितोऽसि मया देव अतः शान्तिं कुरुष्व मे ॥
पयःस्नानम्—कामधेनुसमुद्भूतं देवर्षिपितृतृप्तिदम् । पयो ददामि देवेश ! स्नानार्थं प्रतिगृह्यताम् ॥
दधि—चन्द्रमण्डलसंकाशं सर्वदेवप्रियं दधि । स्नानार्थं ते मया दत्तं प्रीत्यर्थं प्रतिगृह्यताम् ॥
घृतम्—रसानामुत्तमं त्वाज्यं देवानां च सदा प्रियम् । तेन त्वं स्नापितो देव निधिकान्तिप्रदो भव ॥
मधु—यस्य धारणमात्रेण तृप्तिं यान्ति पितामहाः । मधुना स्नापितो देव नित्यं शोकहरो भव ॥
शर्करा—यमलोकभयात् त्रस्तः शरणं त्वां गतः प्रभो ! खण्डस्नानेन देवेश मां कुरुष्व सुखान्वितम् ॥
जलेन—कर्पूरैलासमायुक्तं सुगन्धिद्रव्यसंयुतम् । गन्धोदकेन स्नपनं स्नानार्थं प्रतिगृह्यताम् ॥
आचमनीयम्-कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् । आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥

वस्त्रम्—सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे। मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम्॥
यज्ञोपवीतम्—देवदेव नमस्तेऽस्तु त्राहि मां भवसागरात्। ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम॥
गन्धम्—श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्। विलेपनं सुरश्रेष्ठ गृहाण परमेश्वर!॥
अक्षताः—तण्डुलाश्च यथा शुभ्राः कुंकुमाक्ताः सुशोभनाः। मया निवेदिता भक्त्या गृहाण परमेश्वर॥
पुष्पम्—सेवन्तिका वकुलचम्पकपाटलाब्जैः पुन्नागजातिकरवीररसालपुष्पैः।
बिल्वप्रवालतुलसीदलमालतीभिस्त्वां पूजयामि जगदीश्वर मे प्रसीद॥
यमदूतपूजा—नमोऽस्तु यमदूतेभ्यो बलिनां ये महाबलाः। मनोनिलाक्रान्तवेगाः पाशमुद्गरधारिणः॥
मम सौख्यकराः सन्तु पीडयन्तु न मां क्वचित्। ममापचरितं सर्वं विस्मरन्तु दयालवः॥
यमुनापूजा—यमस्वसुर्नमस्तेऽस्तु सूर्यपुत्रि! नमोऽस्तु ते। लोकमातर्नमस्तेऽस्तु नमस्ते विष्णुवल्लभे॥
वरदा भव मे नित्यं यमुने लोकपूजिते॥
परिचारिकाम्—पूजयामि नमस्तुभ्यं यमुनापरिचारिकाम्। क्षमस्व मम कल्याणि यमुनापरिचारिके!॥

ॐ आकृष्णेति सूर्यम्। ॐ गणानान्त्वेति गणेशम्। ॐ तद्विष्णो रिति विष्णुम्। ॐ नमःशम्भवायेति शिवम्। ॐ ब्रह्मयज्ञानमिति ब्रह्माणं पूजयेत्॥ यथामिलितोपचारैर्मार्कण्डेयाद्यष्टचिरञ्जीविनः पूजयेत्॥

धूपम्—वनस्पतिरसोद्भूतो गन्धाढ्यो गन्धउत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

दीपम्—आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्॥

नाभ्याऽआसीदिति नैवेद्यम्। याफलिनीरिति फलं, ताम्बूलम्। हिरण्यगर्भेति दक्षिणाम्॥

प्रार्थना—धर्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज। पाहि मां किङ्करैः सार्द्धं सूर्यपुत्र! नमोऽस्तु ते॥

सौम्यानां सौम्यरूपाय पापीनां क्रूररूपिणे। अखर्वगर्वशमन कालकाल नमोऽस्तु ते॥

[१]मार्कण्डेयाद्यष्टचिरञ्जीविनः प्रार्थयेत्—

मार्कण्डेयमहाभाग सप्तकल्पान्तजीवन। चिरजीवि यथाऽसि त्वं तथा मे भ्रातरं कुरु॥

बलिराज नमस्तुभ्यं नमस्ते विष्णुवल्लभ। भविष्येन्द्र सुराराते वरदो भव सर्वदा॥

अज्ञानतिमिरे मग्नं जगदुज्ञानैकचक्षुषा। उद्धृतं येन मुनिना तस्मै व्यासाय ते नमः॥

---

१ मार्कण्डेयो बलिर्व्यासो हनुमांश्च विभीषणः। कृपो द्रौणी परशुरामश्चाष्टैते चिरजीविनः॥

राजभक्तैकमुकुट - रत्नज्योतिः - स्वरूपिणे। भविष्यद्ब्रह्मणे तुभ्यं नमो हनुमते नमः॥
विभीषण नमस्तुभ्यं नमस्ते सुरसत्तम। रामभक्त नमस्तुभ्यं पाहि मां सर्वदाऽनघ॥
सप्तर्षिप्रवरं देवं वीरं विप्रस्वरूपिणम्। कृपं नमामि सततं वरदो भव सुव्रत॥
सर्वोपकरणे शक्तं रामं शस्त्रभृतां वरम्। पितृचित्तानुगं विप्रं पूजयामि नमोऽस्तु ते॥

पुष्पाञ्जलिं दत्वा। लोमशं पूजयेत्—

लोमशं सततं नौमि पूजयामि पुनः पुनः। ह्रल्लोमदर्शनात्तस्य ब्रह्मसंख्यानुमीयते॥
वकदाल्भ्यमुनिं नौमि शान्तं सङ्गतमानसम्। यस्यौदासीन्यलेशान्तं गतिं कालत्रयं सदा॥

प्रार्थयेत्—जटिलाः स्मश्रुला दक्षास्त्वग्धमन्यस्थिरूपिणः। मम पापहराः सन्तु सोमसूर्याग्निवर्चसः॥
यथास्ति यमुनादेवी यमेयं भ्रातृशालिनी। तथा मे भ्रातरः सन्तु प्रतिजन्मसु सुव्रताः॥

ततः उक्तरीत्या भ्रातरं समभ्यर्च्य प्रार्थयेत्—

मार्कण्डेय नमस्तेऽस्तु नमस्ते महदायुषे। चिरायुस्त्वं यथा लोके तथा भ्राता भवेन्मम॥
आयुःप्रद महाभाग सोमवंशसमुद्भव। महामते मुनिश्रेष्ठ मार्कण्डेय! नमोऽस्तु ते॥

भ्रातस्तवानुजाताहं भुङ्क्ष्व भोज्यमिदं शुभम्। प्रीतये यमराजस्य यमुनाया विशेषतः॥
यत्प्राप्तं वै यमुनया यमराजस्य पूजनात्। तथा ममापि सकलं भवेज्जन्मनि जन्मनि॥
आयुर्लक्ष्मीर्यशो धैर्यं निर्भयत्वमरोगिता। वाक्पटुत्वमजाड्यं च जायतां मम सर्वदा॥
सर्वा भगिन्यः सम्पूज्या ज्येष्ठानुक्रमतः सदा॥ यथामिलितोपचारैर्भगिनीं पूजयेत्॥ प्रार्थना—
त्वं लक्ष्मीस्त्वमपर्णासि ब्राह्मी त्वं च सरस्वती। त्वत्पूजनाद्भवेयुस्ताः पूजिता मम सर्वदा॥
आयुर्लक्ष्मीर्धनं धान्यं पश्वादिकमरोगिता। सर्वं त्वदर्चनोद्दीप्तं भवेज्जन्मनि जन्मनि॥
पतिपुत्रधनैश्वर्यं सौभ्रात्रं जन्मजन्मनि। अक्षयं जायतां देवि! धर्मराजप्रसादतः॥
कन्याभगिनी पूजने—दयानिधिस्तुल्यवयः स्वरूपो गुणौघपूर्णः कुशलः शतायुः।
क्षितीन्द्रनाथो निजधर्मबुद्धिश्चित्तानुगस्ते पतिरस्तु कन्ये॥
यमस्तुतिः—त्वमेव वैवस्वत विश्वमूर्तिस्त्वमेव कालः कलनान्तरात्मा।
त्वमेव मृत्युः पुरुषस्त्वमेव प्रसीद देवेश! नमो नमस्ते॥
संसारसागरे मग्नं सदाचारविवर्जितम्। अज्ञानपङ्के सीदन्तं मामुद्धर दयानिधे!॥

मत्समो नास्ति पापिष्टस्त्वत्समो नास्ति पापहा । इति विज्ञप्तिरेवात्र त्वदग्रे स्फुटते मुखात् ॥
दयैव तव लोकानां सेतुभूता भवार्णवात् । मामुद्धर दयासिन्धो निरयार्णवतारक ॥
यथा तवार्चनात् देवी यमुना भ्रातृशालिनी । तथा तवार्चनाद्‌ देव भ्रातरः सन्तु मे सदा ॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया । दासोऽयमिति मां ज्ञात्वा प्रसीद परमेश्वर ! ॥

विसर्जनम्—यान्तु देवगणाः सर्वे पूजामादायमामकीम् । इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥

समर्पणम्-यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
कायेन-वाचा-मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिः स्वभावात् ।
करोमि यद्‌यत् सकलं परस्मै नारायणायेति समर्पये तत् ॥

इति यमद्वितीया भ्रातृपूजाविधिः ।

★

तुलसी-पूजाविधिः

आचमनम् (पृ० १) ॐ विष्णवे नमः—नेत्रयोरुदक्स्पर्शनम्। मङ्गलोच्चारणम्—श्रीमन्महागणाधिपतये नमः। श्रीलक्ष्मीनारायणाभ्यां नमः। श्रीउमामहेश्वराभ्यां नमः। वाणीहिरण्यगर्भाभ्यां नमः। शचीपुरन्दराभ्यां नमः। कुलदेवताभ्यो नमः। ग्रामदेवताभ्यो नमः। स्थानदेवताभ्यो नमः। मातृ-पितृचरणकमलेभ्यो नमः। पतिचरणारविन्दाभ्यां नमः। सर्वेभ्यो देवेभ्यो नमः। सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः। निर्विघ्नमस्तु पुण्यं पुण्याहं दीर्घमायुरस्तु॥

मङ्गलदेवता प्रार्थना-सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते॥
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥
अभीप्सितार्थसिध्यर्थं पूजितो यः सुरासुरैः। सर्वविघ्नहरस्तस्मै गणाधिपतये नमः॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्। येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः॥
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव। विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः। येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः॥
विनायकं गुरुं भानुं ब्रह्म-विष्णु-महेश्वरान्। सरस्वतीं प्रणम्यादौ सर्वकामार्थसिद्धये॥
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः। तत्र श्रीर्विजयो भूतिर्ध्रुवानीतिर्मतिर्मम॥
सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः। देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः॥

सङ्कल्पः—ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतोमहापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणो द्वितीय-प्रहरार्द्धे श्रीश्वेतवाराहकल्पे अष्टाविंशतितमे कलियुगे प्रथमचरणे जम्बूद्वीपे भारतवर्षे अमुक देशे ततः (संवत्सराऽयनर्तु-मास-पक्ष-तिथि-वासर-नक्षत्र-योग-प्रातःकालादिनामान्यनुकीर्त्य) देव्या मम सुख-सौभाग्य-सन्तत्यायुरारोग्यैश्वर्याभिवृद्धिद्वारा तुलसीदेवताप्रीत्यर्थं तुलसीपूजनमहं करिष्ये।

कलशपूजनम्—गंगे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥

कलशे वरुणदेवतायै नमः। कलशपूजापरिपूरणार्थं गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि
अस्मिन् कलशे सर्वाणि तीर्थानि आवाहयामि संकल्पयामि नमस्करोमि ॥

पूजाद्रव्यप्रोक्षणम्-अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा। यः स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरःशुचिः॥

घण्टापूजनम्-आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्। कुरु घण्टे महानादं देवतार्चनसन्निधौ ॥
घण्टास्थगरुडदेवतायै नमः। सकलपूजापरिपूरणार्थं गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि।

दीपपूजनम्-दीपस्त्वं ब्रह्मरूपोऽसि ज्योतिषः प्रभुरव्ययः। सौभाग्यं देहि पुत्रांश्च सर्वान् कामांश्च देहि मे ॥
दीपदेवतायै नमः। सकलपूजापरिपूरणार्थं गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥

ध्यानम्-ध्यायेच्च तुलसीं देवीं श्यामां कमललोचनाम्। प्रसन्नां पद्मवदनां वरामयचतुर्भुजाम् ॥
किरीट-हार-केयूर-कुण्डलादि-विभूषणाम्। धवलांकुशसंयुक्तां पद्मासननिवेशिताम् ॥
प्रियां हि सर्वदा विष्णोः सर्वदेवनमस्कृताम्। श्रीतुलस्यै नमः स्नपयामि ॥

आवाहनम्-देवि त्रैलोक्यजननि सर्वलोकैकपावनि। आगच्छ वरदे माता प्रसीद तुलसि प्रिये ॥

आसनम्-सर्वदेवमयि देवि! सर्वदा विष्णुवल्लभे! देवि स्वर्णमयं दिव्यं गृहाणासनमव्यये ॥

श्रीतुलस्यै नमः आसनार्थे अक्षतान् समर्पयामि ॥ एवं सर्वत्र श्लोकान्ते 'श्री तुलस्यै नमः अमुक वस्तु समर्पयामि' इति योज्यम् ॥

पाद्यम्—सर्वे देवा यथा स्वर्गे तथा त्वं भुवि सर्वदा। दत्तं पाद्यं गृहाणेदं तुलसि! त्वं प्रसीद मे ॥

अर्घ्यम्—गन्धपुष्पसमायुक्तं सर्वेषां प्रीतिदायकम्। अर्घ्यं गृहाण त्वं देवि! दैत्यान्तकरणप्रिये ॥

आचमनम्—कर्पूरवासितं तोयं सुवर्णकलशे स्थितम्। दत्तमाचमनीयं च गृहाण हरिवल्लभे! ॥

स्नानम्—गङ्गा-सरस्वती-रेवा-पयोष्णी-नर्मदाजलैः। स्नापितासि मया देवि तथा शान्तिं कुरुष्व मे ॥

मलापकर्षणम्-गङ्गागोदावरीकृष्णापयोष्ण्याद्यापगास्तथा। आयान्तु ताः सदा देव्यस्तुलसीस्नानकर्मणि ॥

पञ्चामृतस्नानम्—पञ्चामृतं मयानीतं पयोदधि-घृतं-मधु। महाशर्करया देवि स्नानार्थं प्रतिगृह्यताम् ॥

श्री तुलस्यै नमः पञ्चामृतस्नानं सम० ॥ पञ्चामृतस्नानान्ते शुद्धोदकस्नानं सम०। शुद्धोदकस्नानान्ते आचमनं सम०। सकलपूजा परिपूरणार्थं गन्धाक्षतपुष्पाणि समर्पयामि ॥

निर्माल्यं विसृज्य पुनश्च गन्धाक्षतपुष्पाण्यर्पयित्वानन्तरमभिषेकं कुर्यात् ॥

अभिषेकः—कृष्णा-सरस्वती-काली-तुङ्गभद्रा शची तथा। भागीरथी पार्वती च रमा नारायणी मता ॥

सुभद्रा द्रौपदी साध्वी माता चैवाप्यरुन्धती। सावित्री कालिकाऽहल्या स्नापयिष्यन्ति सर्वदा॥
तामिः कृताभिषेका त्वं ददासि गुरुसौभगम्। अतस्त्वां स्नापयिष्यामि तुलसी विष्णुवल्लभे॥
ॐ शान्तिः शान्तिः सुशान्तिर्भवतु॥ अमृताभिषेकोऽस्तु॥ श्रीतुलस्यै नमः अभिषेकं स०।
अभिषेकान्ते आचमनं समर्पयामि॥ इति क्षेपकम्॥

वस्त्रम्—क्षीरोदमथनोद्भूते चन्द्रलक्ष्मी सहोदरे। गृह्यतां परिधानार्थमिदं पीताम्बरं शुभम्॥
कञ्चुकीमुपवस्त्रं च नानारत्नैः समन्वितम्। गृहाण त्वं मया दत्तं तुलसी भयहारिणि॥
श्री तुलस्यै नमः कञ्चुकीमुपवस्त्रं च सम०॥ (वस्त्रायभावे अक्षतान् समर्पयेत्॥)

कुङ्कुमम्—केशरागुरुसंयुक्तं चन्दनादिसमन्वितम्। कस्तूरिका समायुक्तं कुंकुमं प्रतिगृह्यताम्॥
अक्षतान्—अक्षतांश्च महादेवि तुलसि सौख्यदायकम्। अर्पयामि सदा भक्त्या सुखसन्तति-लब्धये॥
सौभाग्यद्रव्यम्—हरिद्राकुंकुमं चैव सिन्दूरं कज्जलान्वितम्। मया निवेदितं भक्त्या गृहाण परमेश्वरि॥
पुष्पाणि—माल्यादीनि सुगन्धीनि मालत्यादीनि सत्तमे। मयाहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम्॥
धूपम्—वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

दीपम्—वैश्वानरप्रज्वलितं घृतकार्पासनिर्मितम्। दीपं भक्तया गृहाणेदं त्रैलोक्यध्वान्तनाशिके ॥
नैवेद्यम्—अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम्। नैवेद्यार्थेऽर्पयाम्येतत् तुलसी माधवप्रिये ॥
श्रीतुलस्यै नमः नैवेद्यं समर्पयामि। प्राणाय नमः। पानाय नमः। व्यानाय नमः। समानाय नमः। उदानाय नमः। ग्रासमुद्राः प्रदर्शयेत् ॥ श्रीतुलस्यै नमः नैवेद्यान्ते आचमनीयं समर्पयामि ॥
मध्ये—पानीयमुत्तरापोशनं हस्तप्रक्षालनं करोद्वर्तनार्थं चन्दनं समर्पयामि ॥
फलम्—इदं फलं मया देवि स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥
ताम्बूलम्—पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्। कर्पूरैलादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
दक्षिणा—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥
कर्पूरारात्रिक्यम्—नीराजयामि सततं हरिवल्लभे वै कर्पूरवर्तिभिरलं सुखदायके! त्वाम्।
पादौ भजाम्यविरतं तव देवि! मां च वंशाय सौख्यमपि देहि बलं च पूर्णम् ॥
प्रदक्षिणा—यानि कानि च पापानि जन्मान्तरकृतानि च। तानि सर्वाणि नश्यन्ति प्रदक्षिण पदे पदे ॥
नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये। नमः आहवनीयाय तुलस्यै ते नमो नमः ॥

पुष्पाञ्जलिः—विष्णुप्रियकरे देवि तुलसि सुखदायिके ! पुष्पाञ्जलिं प्रयच्छामि पत्युरायुष्यवृद्धये ॥

विशेषार्घः—गन्धप्रसूनसंयुक्तं फलमुक्तादिशोभितम् । अर्घ्यं ददामि तुलसि ! तव प्रीत्यै नमो नमः ॥

प्रार्थना—सौभाग्यं सन्ततिं देवि धनं धान्यं च मे सदा । आरोग्यं शोकशमनं कुरु मे माधवप्रिये ॥
अभीष्टफलसिद्धिं च सदा देहि हरिप्रिये ! देवैस्त्वं निर्मिता पूर्वमर्चिताऽसि मुनीश्वरैः ॥
अतो मां सर्वदा भक्त्या कृपादृष्ट्या विलोकय । पत्युरायुश्च भाग्यं च सदा देहि हरिप्रिये ॥
पूतनाभयसंत्रासाद्यु रक्षितश्च यथा हरिः । तथा संसारसन्त्रासाद्रक्ष मे वंशमुत्तमम् ॥
श्रीतुलस्यै नमः प्रार्थनां समर्पयामि ॥

अर्पणम्—अनेन मम यथाशक्त्या पूजनेन तुलसी देवता प्रीयताम् ॥ इति तुलसीपूजा समाप्ता ॥

★

पूर्णिमायां चन्द्र-पूजाविधिः

चन्द्रोदये शुचिराचान्तः शुक्लाम्बरावृतः श्वेतगन्धानुलेपनः शुचिर्भूमौ आसनमास्तीर्य तदुपरि प्राङ्मुख उपविश्य सङ्कल्पः—ॐ अद्येत्यादि अमुकगोत्रस्य मम पुत्रायुधन-सम्पत्ति-सौभाग्यारोग्यादिप्राप्तये ग्रहभय-व्याधि-विषदोषनिवारणार्थं चन्द्रमसं पूजयिष्ये।

ततो दीप-कलश-गणेश पूजां विधाय पूजासामग्रीं सम्पाद्य पूजामण्डलं सम्पादयेत्॥ उपलिप्तायां समभूमौ पिष्टेन सकर्णिकमष्टपत्रं तद्बहिः षोडशपत्रं तद्बहिरष्टाविंशति वृत्तं तद्बहिः कान्तिमालावृत्तं लिखेत्। तत्र कर्णिकायां दुग्धपूरितां रौप्यस्थालीं रौप्यस्थालिमध्ये कांस्यं रौप्यं वा स्थापयित्वा तदुपरि चन्द्रबिम्बं स्थापयेत्।

ततः स्वाग्रे वृत्तत्रयं चन्दनादिना संलिख्य अर्घ्याधारं सम्पूज्याधारे अग्नेर्दशकलाः सम्पूज्य तत्रार्घपात्रं संस्थाप्यार्घपात्रे सूर्यस्य द्वादशकलाः सम्पूज्य तत्र विलोममातृकया जलेनापूर्य अत्र जले चन्द्रस्य षोडशकलाः सम्पूज्य धेनुमुद्रा प्रदर्श्य तेन जलेनात्मानं पूजासामग्रीं च सम्प्रोक्ष्य भूतशुद्धिं प्राणप्रतिष्ठां च कृत्वा स्वमस्तके अमृताधारं चन्द्रं ध्यात्वा मूलमन्त्रेणाञ्जलित्रयं चन्द्रबिम्बे दद्यात्। ततो गुरुं शिवं च नत्वा

पीठपूजा—ॐ मूलप्रकृतये नमः । आधारशक्तये नमः । कूर्माय नमः । अनन्ताय नमः । पृथिव्यै नमः । श्वेतद्वीपाय नमः । कल्पवृक्षाय नमः । रत्नमण्डपाय नमः । सिंहासनाय नमः । आग्नेयादि क्रमेण—ॐ धर्माय नमः । ज्ञानाय नमः । वैराग्याय नमः । ऐश्वर्याय नमः । पूर्वादि क्रमेण—ॐ अधर्माय नमः । अज्ञानाय नमः । अवैराग्याय नमः । अनैश्वर्याय नमः । मध्ये—आत्मने नमः । अन्तरात्मने नमः । ज्ञानात्मने नमः । परमात्मने नमः । अग्निमण्डलाय नमः । सोममण्डलाय नमः । सूर्यमण्डलाय नमः । सं सत्त्वरूपाय नमः । रं रजोरूपाय नमः । तं तमोरूपाय नमः । ह्रां सर्वशक्तिकमलासनाय नमः । पूर्वाद्यष्टदिक्षु—ॐ अमृताय नमः १ । तारकायै नमः २ । ज्योत्स्नायै नमः ३ । विमलायै नमः ४ । व्यापिन्यै नमः ५ । चित्रायै नमः ६ । कृत्तिकायै नमः ७ । कान्त्यै नमः ८ । मध्ये—श्रवणायै नमः । सौं अमृतकलात्मने संवित्पीठाय नमः । पीठे पुष्पाञ्जलिं दत्वा सम्पूजयेत्, हस्ते पुष्पाञ्जलिं गृहीत्वा

ध्यानम्—कुन्दकर्पूरसंकाशं श्वेतपद्मकरद्वयम् । एकास्यं द्वीक्षणं सौम्यं श्वेतांशुं मणिभूषितम् ॥
सप्तहस्तं विमानस्थं रोहिण्यासहितं स्मितम् । सशक्ति सायुधं साङ्गं कलाषोडशभिर्युतम् ॥

आवाहनम्—आत्मसंस्थमजं शुद्धं त्वामहं परमेश्वर ! पूजयामि च हव्यांशं मूर्तिमावाहयाम्यहम् ॥
स्थापनम्—तवेयं महिमामूर्तिस्तस्यां त्वां सर्वग प्रभो ! भक्तिस्नेहसमाकृष्टो दीपवत्स्थापयाम्यहम् ॥
आसनम्—सर्वान्तर्यामिणे देव ! सर्वबीजमयं शुभम् । स्वात्मच्छायापरं शुद्धमासनं कल्पयाम्यहम् ॥
अस्मिन् वरासने देव ! सुखासीनोक्षरात्मक । प्रतिष्ठितो भवेशस्त्वं प्रसीद परमेश्वर ॥
स्वागतम्—यस्य दर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये । तस्मै ते परमेशाय स्वागतं स्वागतं च ते ॥
सुस्वागतम्—कृतार्थोनुगृहीतोऽस्मि सफलं जीवितं मम । आगतो देव देवेश सुस्वागतमिदं पुनः ॥
पाद्यम्—यद्भक्तिलेशसम्पर्कात् परमानन्दसम्भवः । तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये ॥
अर्घ्यम्—तापत्रयहृतं दिव्यं परमानन्दलक्षणम् । तापत्रयविनिर्मुक्तस्त्वार्घ्यं कल्पयाम्यहम् ॥
आचमनम्—वेदानामपि वेदाय देवानां देवतात्मने । कल्पयामि सशुद्धानां तोयं संशुद्धिहेतवे ॥
मधुपर्कम्—सर्वकालुष्यहीनाय परिपूर्ण सुखात्मने । मधुपर्कमिमं देव ! कल्पयामि प्रसीद मे ॥
पुनराचमनम्-उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमात्रतः । शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥
पञ्चामृतस्नानं, पयसा-देवाद्यैर्निर्मिता धेनुः सर्वपापप्रणाशिनी । तत् क्षीरस्नापितो देव ! नित्यं मे वरदो भव ॥

दध्ना—कामतोऽकामतो वापि यन्मया दुष्कृतं कृतम्। तत्सर्वं विलयं यातु दधिस्नानेन कामद ॥
घृतेन—रसानामुत्तमं त्वाज्यं देवानां च सदा प्रियम्। तेन त्वं स्नापितो देव निधिकान्तिप्रदो भव ॥
मधुना—यस्य स्मरणमात्रेण तृप्तिं यान्ति पितामहाः। मधुना स्नापितो देव! नित्यं शोकहरो भव ॥
शर्करया—यमलोकभयात् त्रस्तः शरणं त्वां गत प्रभो! खण्डस्नानेन देवेश! मां कुरुष्व सुखान्वितम् ॥
शुद्धोदकेन—परमानन्दबोधाब्धौनिमग्ननिजमूर्त्तये। साङ्गोपाङ्गमिदं स्नानं कल्पयाम्यहमीश! ते ॥
वस्त्रम्—मायाचित्रपटाच्छन्ननिजगुह्योरुतेजसे। निरावरणविज्ञानं वाससस्ते कल्पयाम्यहम् ॥
उत्तरीयकम्-यमाश्रित्य महामाया जगत्सम्मोहिनी सदा। तस्मै ते परमेशाय कल्पयाम्युत्तरीयकम् ॥
यज्ञोपवीतम्—यज्ञशक्तिक्षयेणेदं सम्प्रीतमखिलं जगत्। यज्ञसूत्राय तस्मै ते इदं सूत्रं प्रकल्पये ॥
आभूषणानि—स्वभावसुन्दरा वर्णाः पीताम्बरधराय च। भूषणानि विचित्राणि कल्पयाम्यमरार्चित ॥
चन्दनम्—परमानन्दसौभाग्यपरिपूर्णदिगन्तरः। गृहाण परमं गन्धं कृपया परमेश्वर! ॥
पुष्पम्—तुरीयवनसम्भूतं नानागुणमनोहरम्। अमन्दसौरभं पुष्पं गृह्यतामिदमुत्तमम् ॥
अक्षताः—अक्षतान् धवलान् देव गृहाण वरदर्षभ! सर्वदेवोत्तमस्त्वं हि अक्षयं कुरु मे फलम् ॥

आवरणपूजा, पूर्वादिक्रमेण–ॐ रोहिण्यै नमः १। कृत्तिकायै० २। रेवत्यै० ३। भरण्यै० ४। रात्र्यै० ५। आर्द्रायै० ६। ज्योत्स्नायै० ७। कलायै० ८। मध्ये–ॐ हारसमप्रभायै०। पुनः पूर्वादिक्रमेण–ॐ आदित्याय नमः १। मङ्गलाय० २। बुधाय० ३। शनये० ४। बृहस्पतये० ५। राहवे० ६। शुक्राय० ७। केतुभ्यो नमः ८॥ ततः षोडशपत्रेषु चन्द्रस्य षोडशकला पूर्वादिक्रमेण पूजयेत्–

ॐ अमृतायै नमः १। मानदायै० २। पूषायै० ३। तुष्ट्यै० ४। पुष्ट्यै० ५। रत्यै० ६। धृत्यै० ७। शशिन्यै० ८। चन्द्रिकायै० ९। कान्त्यै० १०। ज्योत्स्नायै० ११। श्रियै० १२। प्रीत्यै० १३। अङ्गदायै० १४। पूर्णायै० १५। पूर्णामृतायै० १६। बहिरष्टाविंशतिविन्दुषु पूर्वादिक्रमेण नक्षत्राणि पूजयेत्–ॐ रोहिण्यै नमः १। मृगशीरसे नमः २। आर्द्रायै० ३। पुनर्वसवे० ४। तिष्याय० ५। अश्लेषायै० ६। मघायै० ७। पूर्वाफाल्गुन्यै० ८। उत्तराफाल्गुन्यै० ९। हस्ताय० १०। चित्रायै० ११। स्वात्यै० १२। विशाखायै० १३। अनुराधायै० १४। ज्येष्ठायै० १५। मूलाय० १६। पूर्वाषाढायै० १७। उत्तराषाढायै० १८। अभिजिते० १९। श्रवणाय० २०। धनिष्ठायै० २१। शतभिषजे० २२। पूर्वाभाद्रपदायै० २३। उत्तराभाद्रपदायै० २४। रेवत्यै० २५। अश्विन्यै०

२६। भरण्यै० २७। कृत्तिकायै० २८॥ इत्यावरणपूजां कृत्वा देवाय पुष्पाञ्जलिम्—

अभीष्टसिद्धिं मे देव! शरणागतवत्सल! भक्त्या समर्पये तुभ्यं समस्तावरणार्चनम्॥

धूपम्—वनस्पतिरसोद्दिव्यो गन्धाढ्यो गन्धउत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

दीपम्—सुप्रकाशो महान् दीपः सर्वतस्तिमिरापहः। सबाह्याभ्यन्तरज्योतिर्दीपोऽयं प्रतिगृह्यताम्॥

नैवेद्यम्—सत्पात्रसिद्धसुहविर्विविधानेकभक्षणम्। निवेदयामि देवेश! सानुगाय गृहाण तत्॥

आचमनम्—गङ्गा च यमुना चैव नर्मदा च सरस्वती। ताभ्यो जलं मयानीतं पुनराचमनीयकम्॥

ताम्बूलम्—पूगीफलं सताम्बूलं खदिरादिमनोहरम्। कर्पूरादि समायुक्तं ताम्बूलं प्रतिगृह्यताम्॥

फलम्—इदं फलं मया देव स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥

सुगन्धिद्रव्यम्-संसारार्णवमग्नं च त्राहि मां रोहिणीपते! सुगन्धञ्च सुरश्रेष्ठ! गृहाण परमेश्वर॥

हिरण्यम्—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

नीराजनम्-त्वं ज्योतिः सर्वदेवानां तेजसां तेज उत्तमम्। आत्मज्योतिः परं धाम दीपोऽयं प्रतिगृह्यताम्॥

दर्पणम्—दर्शनेन त्वमादर्श! नूनं मङ्गलदायक! शौर्य-सौभाग्य-सत्कीर्तिनिर्मलज्ञानदो भव॥